कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-2687

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
श्री. रामायण बालकांड		पुराण	पूर्ण		५/12	80	संस्कृत	कागद	12	43		

॥ अध्यात्मरामायणप्रारंभ ॥ श्रीरामायनमः ॥

अ०रा०वा
१

श्री गणेशाय नमः ॥ श्री विश्वेश्वराय नमः ॥ विशेनवश जलधौ पूर्णप्रीतकरो परः ॥ प्रजाल्हा
दकरो विष्णुः भूषणः कौस्तुभोपरः ॥ अत्र विष्णुभूषणत्वेन परमभक्ततया सदा ॥ भगवद्धृदयारूढ
तासध्वनिता ॥१॥ नाम्ना हिम्मतिवर्माभूत् धैर्येण हिमवानिव ॥ रूपेण जितकंदर्पः क्षमया क्षमयासमः
२ ॥ पराक्रमेर्जुनः साक्षात्तेजसा भानुमानिव ॥ भूपानां भ्रष्टराज्यानां पुनराज्यप्रदायकः ॥३॥ यं दृष्ट्वार्थि
समूहस्य जाते यं निश्चिता मतिः ॥ हित्वा पशुत्वं स्त्रीत्वं च कामधुक् भूमिमागता ॥४॥ तस्मोजातो राज
मरदत्तश्चंद्रश्चंद्र इवापरः ॥ मित्राणां च रिपूणां च मानदः प्रथितः प्रभुः ॥ मानदः मानदाता मानखंड
श्च आसमुद्रं क्षमादेवी यत्कीर्त्या धवलीकृता ॥ हिमाचलेन समतां नीताः सप्तापि चाचलाः ॥६॥ यद्दानां
तु प्रवाहेण मेघोदस्यानपेक्षकाः कृषीवलाः प्रतिदिशं प्रहृष्यन्ति दिने दिने ॥७॥ तेन श्रीरामभक्तेन सर्वा
विद्याः प्रजानता ॥ शृंगवेरपुरेशेन रिपुकक्षदवाग्निना ॥८॥ अर्थिनां कल्पवृक्षेण विद्वज्जनसभासदा
भट्टनागेशशिष्येण वध्यते रामवर्मणा ॥ प्रणम्य जानकीजानिं रामं कामातिसुंदरं ॥ चापबाणधरं देवं मा
यामानुषविग्रहं ॥१०॥ सेतुः परोपकृतये ध्यात्मरामायणं बुधौ ॥ सुप्रावृमणिभिः श्लक्ष्णैः प्रीयतां तेन राघ
वः ॥ श्रीमता वाल्मीकिना लोकोद्धारे ॥ यच्च कृते रामचरित्र वर्णनरूपे रामायणाख्य काव्ये भगवतो ली
लावतारस्य रामस्य रावणादीनां दृढमनुष्यत्व बुद्ध्येन टवरात्मस्वरूप गोपनेन व्यवहरतः स्वरूपं वाल्मी

राम
१

किनागमस्तमेव तत्र तत्र निरूपितं तदेतत्परमदयालुर्भगवान्साक्षाद्वेदव्यासो लोकानां स्फुटं बोधयितुं नारदब्रह्मसंवादरूपेण ब्रह्मांडपुराणेऽध्यात्मरामायणाख्यसंहितां चक्रे तस्याश्च वाल्मीकिसूचितार्थज्ञापकत्वं बोधयितुं वाल्मीकिरामायणवदेव कांडसर्गोयिततां कृतवान्तां यथामति स्वमतिदोषशुद्ध्ये व्याचक्ष्महे तामेनां संहितां नैमिषारण्ये नैमिषीयानृषीन् श्रावयति स्म सूत इत्याह॥ अप्रमेयेति अप्रमेयं त्रयं मायाजीवेश्वररूपं तदतीतस्ततोऽधिकश्चासौ निर्मलं यत् ज्ञानं तत्स्वरूपाय नमः॥ मनोगिरां विदूराय वाङ्मन

श्रीगणेशाय नमः॥ अप्रमेयत्रयातीतनिर्मलज्ञानमूर्त्तये मनोगिरां विदूराय दक्षिणामूर्त्तये नमः॥१॥ सूत उवाच॥ कदाचिन्नारदो योगी परानुग्रहवांछया पर्यटन्सकलाँल्लोकान्सत्यलोकमुपागमत्॥२॥

॥सागोचरायेत्यर्थः॥१॥ सूत उवाचेति

कदाचिदिति योगी योगपक्वकषायः तया विदितवेदितव्यः॥ नादृशस्य पर्यटनं विफलं॥ तत्राह॥ परेति परेषां तत्तल्लोकवासिनां धर्मज्ञानाद्युपदेशेन योऽनुग्रहस्तदिच्छयेत्यर्थः॥ सत्यलोकं ब्रह्मलोकं॥२॥ तत्र ब्रह्मलोके॥ मुनिपुंगवो नारद उच्यमानगुणं चतुर्मुखं दृष्ट्वा तुष्टावेति अग्रिमस्तृतीयः श्लोकस्थेन संबं

ए॰ श्र॰ बा॰
२

धः मूर्त्तिमद्भिः गृहीतविग्रहैः छंदोभिर्वेदैः परितोवेष्टितं तत्तद्देहाध्येतृमुखं स्वंमुखे तत्तद्देहमूर्द्धसंबस्यानादि-
तिभावः ॥ बालार्कप्रभया बालार्कसदृशया स्वप्रभया ॥ ३ ॥ सर्वार्थगोचरज्ञानं अतीतानागतवर्त्तमानरूपा
ये सर्वेऽर्थास्तद्विषयज्ञानयुक्तं बहुव्रीहिसमासः ॥ अतएव तत् ज्ञानरूपया सरस्वत्याख्यया शक्त्या यु-

तत्र दृष्ट्वा मूर्त्तिमद्भिश्छंदोभिः परिवेष्टितं ॥ बालार्कप्रभया सम्यक् भासयंतं सभागृ-
हं ॥ ३ ॥ मोंकौरेयादिमुनिभिः स्तूयमानं मुहुर्मुहुः ॥ सर्वार्थगोचरज्ञानं सरस्वत्या सम-
न्वितं ॥ ४ ॥ चतुर्मुखं जगन्नाथं भक्ताभीष्टफलप्रदं ॥ प्रणम्य दंडवद्भक्त्या तुष्टाव
मुनिपुंगवः ॥ ५ ॥ संतुष्टस्तं मुनिं प्राह स्वयंभूर्वैष्णवोत्तमं ॥ किं प्रष्टुकामस्त्वमसि तद्व-
दिष्यामि ते मुने ॥ ६ ॥ इत्याकर्ण्य वचस्तस्य मुनिर्ब्रह्माणमब्रवीत् ॥ त्वत्तः श्रुतं मया
सर्वं पूर्वमेव शुभाशुभं ॥ ७ ॥

हितमशुभं निश्चितं ॥ ७ ॥

॥ स्कं ॥ ४ ॥ जगन्नाथं जगत्स्रष्टारं भक्ताभीष्टफलप्रदं त्वेन प्रश्न-
योग्यतासूचनं ॥ ५ ॥ स्वयंभूरित्यनेनानोहृतज्ञातत्वं सूचितं वैष्णवोत्तमं सर्वभूतेषु यः पश्येत् भगव-
द्भावमात्मनः भूतानि भगवत्यात्मन्येष भागवतोत्तमः इत्युक्तलक्षणं तस्य दृष्टं वस्त्वित्यर्थः ॥ ६ ॥ शुभंवि

एम
२

एकमेव पुण्यहीनानां परलोकस्यास्युपायस्त्वं तद्रहस्यमपि मत्पृष्टं ब्रूहि॥ अनुग्रहः परोपकारकरणं ज पुण्येनायं युज्यतामित्येवंरूपादपायादिमयीत्यर्थः॥ ८॥ दुराचाररताः निषिद्धकर्मनिरताः तस्यैव प्रपंचः सत्यवार्त्तेति॥ नानृतं वदेदिति निषिद्धानृतभाषणशीला इति यावत्॥ ९॥ १०॥ सर्वपापस्य मूलकारणमाह देहात्मदृष्टय इति देह एवात्मदृष्टिर्येषां ते इत्यर्थः॥ एवं च देहनाशेनात्मनाशात् पापपुण्यफलभोक्तु

इदानीमेकमेवास्ति श्रोतव्यं सुरसत्तम॥ तद्रहस्यमपि ब्रूहि यदि तेनुग्रहो मयि॥ ८॥ प्राप्ते कलियुगे घोरे नराः पुण्यविवर्जिताः॥ दुराचाररताः सर्वे सत्यवार्त्तापराङ्मुखाः॥ ९॥ परापवादनिरताः परद्रव्याभिलाषिणः॥ परस्त्रीसक्तमनसः परहिंसापरायणाः॥ १०॥ देहात्मदृष्टयो मूढा नास्तिकाः पशुबुद्धयः॥ मातापितृकृतद्वेषाः स्त्रीदेवाः कामकिंकराः॥ ११॥

॥ रभावात्तथा दृष्टीनां विहिताकरणनिषिद्धकरणयोः। प्रवृत्तिरितिभावः स्थूलोहं गौरोहमिति प्रतीति। स्तु शुक्तौ रजतप्रतीतिवद्भ्रम इति तत्त्वं देहस्य परिणामित्वं तु प्रतिक्षणोपचयाभ्यां प्रत्यक्षसिद्धमात्मनोऽविनाशित्वं तु अविनाशी वाऽरेयमात्मेति श्रुतिसिद्धं अत एव नास्तिका नास्ति परलोक इति बुद्धिमंतः पशुबुद्धयः आहारविहारमात्रपरा विधिनिषेधानभिज्ञाश्चेत्यर्थः स्त्रीदेवाः स्त्रीजिता इत्यर्थः॥ तेषामन्नस्याभोज्यत्वं च स्मृतिसूक्तं कामकिंकराः काम्यकर्ममात्रपरः॥ ११॥

अ॰ए॰वा॰
३

विप्रालोभग्रहग्रस्तावेदविक्रयजीविनः॥धनार्जनार्थमभ्यस्तविद्यामदविमोहिताः॥१२॥

लोभरूपग्रहेण भूतादिनाग्रस्ताः॥ वेदविक्रयजीविनः भृतकाध्यापकाः धनार्जनफलकतयाऽभ्यस्ता या विद्या त
न्मदेन तद्गर्वेण विमोहिताः॥ इतरावज्ञाशीलाः॥१२॥ त्यक्तेति॥ अत्र विप्रा इत्यनुवर्त्तते त्यक्तं स्वजातिकर्म
ब्राह्मणजात्युचितकर्माध्यापनादि यैरतः॥ परवंचकाः परवंचनायैव धर्मानुष्ठानवंतः क्षत्रियादयो
प्येवमेवेत्याह॥ क्षत्रिया इति॥ स्वधर्मत्यागरूपं शीलं येषां न तु कदाचिदपि धर्मशीला इत्यर्थः॥१३॥ ब्राह्म

त्यक्तस्वजातिकर्माणः प्रायशः परवंचकाः॥ क्षत्रियाश्च तथा वैश्याः स्वधर्मत्यागशीलिनः॥१३॥
तद्वच्छूद्राश्च ये केचित् ब्राह्मणाचारतत्पराः॥ स्त्रियश्च प्रायशो भ्रष्टा भर्त्रवज्ञाननिर्भयाः॥१४॥
श्वशुरद्रोहकारिण्यो भविष्यंति न संशयः॥ एतेषां नष्टबुद्धीनां परलोकः कथं भवेत्॥१५॥ इ
ति चिंताकुले चित्ते जायते मम संततं॥ लघूपायेन येनैषां परलोकगतिर्भवेत्॥१६॥ तमुपाय
मुपाख्याहि सर्ववेत्ति यतो भवान्॥ इत्युर्वीवाक्यमाकर्ण्य प्रत्युवाचांबुजासनः॥१७॥

णाचारतत्प
र इत्यनेन धर्मसंकरो दर्शितः स्त्रियश्चेत्यनेन वर्णसंकरो दर्शितः भर्त्तुरवज्ञाने निर्भयो निःशंकाः॥ भर्त्रवज्ञा
नेति पाठे वष्टि भागुरिरित्यनेनावस्यादेरकारस्य लोपः॥१४॥१५॥ परलोकगतिः॥ भूर्लोकोर्ध्वभुवर्लोकादिब्रह्म
लोकातगमनं॥ तच्च दुराचारादिजानर्थनिवृत्तिं विना चित्तशोधकसकलधर्मं विना च दुःप्रापमिति भावः॥१६॥

ब्रह्मा प्रत्युवाचेति सूतोक्तिः॥१७॥

नन्वीह शोपायज्ञानं मम कथ्यस्वादिति चे
त्तत्राह सर्ववेत्तीति यतो भवान् सर्वज्ञ इति
भावः॥ इत्युर्वीरहस्यवाक्यमाकर्ण्यांबुजासनो

रा॰म॰
३

साधुसर्वजनहितंयतः पृष्टमतः सादरंवक्ष्येतदुत्तरमिति शेषः॥ तच्छृणु तदेवाह पुरेति त्रिपुरहंतारं शिवं भक्तव
त्सलेत्यनेन पार्वतीप्रश्नोपि स्वभक्तसकलजनकरुणया तदुद्धारार्थ इति सूचितं गूढं स्वातिरिक्ताज्ञातं वक्ष्यमाणं
वस्तुव्याख्यातवान्॥ कथितवानित्यर्थः॥१८॥ तत्किं तन्नाह पुराणोत्तममिति पुराणमनादित्वात्तत्॥ उत्तमंच श्र
वणेन सर्वधर्मजनकत्वाच्चित्तशुद्धिएतत्वज्ञानजनकत्वाच्चेति भावः॥ आध्यात्मरामायणमित्यन्वर्थग्रंथनाम

साधु पृष्टं त्वया साधो वक्ष्ये तच्छृणु सादरं॥ पुरा त्रिपुरहंतारं पार्वती भक्तवत्सलं॥१८॥ श्रीराम
तत्वजिज्ञासुः पप्रच्छ विनयान्विता॥ प्रियायै गिरिशस्तस्यै गूढं व्याख्यातवान्स्वयं॥१९॥ पुराणो
त्तममध्यात्मरामायणमिति स्मृतं॥ तत्पार्वती जगद्धात्री पूजयित्वादिवानिशं॥२०॥ आलोचयं
ती स्वानंदमग्नातिष्ठति सांप्रतं॥ प्रचरिष्यति तल्लोके माएपऽदृष्टवशाप्य हा॥२१॥

॥आत्मनीत्य
ध्यात्मं आत्मनि चित्ते तर्यामितया वर्त्तमानो यो रामो रमंते योगिनोत्रेति व्युत्पत्तेंतर्यामी तस्यायनं चित्तशुद्धि
द्वारा प्रापकं तत्प्रतिपादकत्वादिति॥ तत्र अध्यात्मरामायणं॥ उत्तरश्लोकस्थे आलोचने इदमेव कर्म॥२०॥ स्वा
नंदमग्ना॥ स्वस्वरूपानंदमग्ना तिष्ठति यत्तत्सांप्रतमुक्तं॥ एतदालोचनेन स्वस्वरूपानंदस्य जगदंतर्यामिरूप
स्य सम्यग्भानादिति भावः॥२१॥ अध्यात्मकेतिष्ठतियः परात्मारामोयेंतेयत्रहितत्वविज्ञैः। अतो विधानं कथितं

भवान्यै अध्यात्मरामायणमस्मेन ॥२२॥

अध्यात्मरामायण ब्रह्मांडपुराणांतर्गत

संप्रवर्त्तते ॥ जनेति शेषः ॥ २३ ॥ सर्वेषां पापघ्नस्तत्वात्कालाविति भावः ॥ २४ ॥ शास्त्राणि न्यायादीनि विवदंते विवादं कुर्वंते आत्मविषये इत्यर्थः कर्त्ता भोक्ता ज्ञाना आत्मा परस्परं भिन्न इति काणादो गौतमाश्च षोडशादिपदार्थानां परस्परमात्मनि भेदज्ञानान्मुक्तिरित्यादि च ज्ञानस्वरूपा अनेके जीवास्तेषां प्रकृत्यादिभ्यो भेदज्ञानान्मोक्ष इति सांख्यादयः । एक एव चेतन उपाधिभेदान्नानात्वं प्राप्तस्तत्वमस्यादिवाक्यजन्यश्रवणमनननिदिध्यासने

तस्याध्ययनमात्रेण जना यास्यंति सद्गतिं ॥ तावद्विजृंभते पापं ब्रह्महत्यापुरःसरं ॥ २२ ॥ यावज्जगति नाध्यात्मरामायणमुदेष्यति ॥ तावत्कलिमहोत्साहो निःशंकं संप्रवर्त्तते ॥ २३ ॥ यावज्जगति नाध्यात्मरामायणमुदेष्यति ॥ तावद्यमभटाः शूरास्संचरिष्यंति निर्भयाः ॥ यावज्जगति नाध्यात्मरामायणमुदेष्यति ॥ २४ ॥ तावत्सर्वाणि शास्त्राणि विवदंते परस्परं ॥ यावज्जगति नाध्यात्मरामायणमुदेष्यति ॥ २५ ॥ तावत्स्वरूपं रामस्य दुर्बोधं महतामपि ॥ यावज्जगति नाध्यात्मरामायणमुदेष्यति ॥ २६ ॥

ब्रह्मैवाहमिति ज्ञानादुपाधिविलये स्वस्वरूपेणावस्थानमेव मोक्ष इत्यौपनिषदसिद्धांतः अध्यात्मरामायणोदये स्फुटो भविष्यति तत्तच्छास्त्रवासनाजन्यो वादो लयमेष्यतीति भावः ॥ २४ ॥ रामस्य स्वरूपं ॥ सच्चिदानंदाद्वयब्रह्मस्वरूपं महतामपि शास्त्रवासनामपि दुर्बोधं भवतीति शेषः ॥ २६ ॥ श्रीरामाय नमः ॥ श्रीरामाय नमः ॥ ॥ ॥

चयनतस्पुण्यं दुर्लभं तत्फलं तस्याध्यात्मरामायण
पुस्तकदातुः संभवेदित्यर्थः ॥३५॥ ॥ ॥ ॥ ॥

२७॥२८॥ अध्यात्मरामायणतः ॥ सार्वविभक्तिकः षष्ठ्यंतात्तसिः ॥२९॥ जीवन्मुक्त इति तद्वत्र लक्षणं च दुःखेष्वनुद्विग्न
मनाः सुखेषु विगतस्पृहः ॥ वीतरागभयः क्रोधः स्थितधीर्मुनिरुच्यते इत्यादिना गीतायामुक्तं ॥ बालिशेपि निद्रादौ

अध्यात्मरामायणसंकीर्त्तनश्रवणादिजं ॥ फलं वक्तुं न शक्नोमि कात्स्न्येन मुनिसत्तम ॥२७॥
तथापि तस्य माहात्म्यं वक्ष्ये किंचित्त शानघ ॥ शृणु चित्तं समाधाय शिवेनोक्तं पुरा मम ॥२८॥
अध्यात्मरामायणतः श्लोकं श्लोकार्द्धमेव वा ॥ यः पठेद्भक्तिसंयुक्तः स पापान्मुच्यते क्षणात् ॥२९॥
यस्त्वभ्यस्यहमध्यात्मरामायणमनन्यधीः ॥ यथाशक्ति वदेद्भक्त्या स जीवन्मुक्त उच्यते ॥३०॥
योभक्त्यार्चयते ध्यात्मरामायणमतंद्रितः ॥ दिने दिने श्वमेधस्य फलं तस्य भवेन्मुने ॥३१॥ यदृ
च्छयापि योध्यात्मरामायणमनादरात् ॥ अन्यतः शृणुयान्मर्त्यः सोपि मुच्येत पातकात् ॥३२॥ न
मस्करोति योध्यात्मरामायणमदूरतः ॥ सर्वदेवार्चनफलं संप्राप्नोति न संशयः ॥३३॥ लिखित्वा पु
स्तके ध्यात्मरामायणमशेषतः ॥ यो दद्याद्रामभक्तेभ्य स्तस्य पुण्यफलं शृणु ॥३४॥ अधीतेषु
च वेदेषु शास्त्रेषु व्याहृतेषु च ॥ यत्फलं दुर्लभं लोके तत्फलं तस्य संभवेत् ॥३५॥
॥ जागरस्याते यो भाव
उपजायते तं भावं भावयन्नूरामजीवन्मुक्तः सदा भवेति ॥३०॥३१॥ अनादरेणत्यदृच्छयापि न तु पूरणश्रवणे

विधुत्क नियमेत्यर्थः ॥३२॥३२॥३३॥३४॥
अधीतेष्विति सांगवेदाध्ययने शास्त्राध्ययने

२१४६६५

१ एकादशीदिने ध्यात्मरामायणमुपोषितः ॥

रा०वा०अ० ३६ जागरितः कृतजागरण ॥३७॥ आत्मतुल्यं धनं अतिप्रियं वस्त्रिसर्पिः सर्वतोमुखेन जले स्थित इति शेषः पुष्करं सर्व
५ मुखमिति जलपर्यायेष्वभिधानात् ॥३८॥ व्यासतुल्येभ्य इति अनेनेदृशप्रदेयवस्तुकालसंप्रदानविशेषाणं ॥ पुपयाति प्रायः

१ योरामभक्तः सदासिव्याकरोति नरोत्तमः ॥ तस्य पुण्यफलं वक्ष्ये शृणु वैष्णवसत्तम ॥३६॥ प्रत्यक्षरं तु
गायत्रीपुरश्चर्याफलं भवेत् ॥ उपवासव्रतं कृत्वा श्रीरामनवमीदिने ॥३७॥ रात्रौ जागरतोध्यात्मरामायण
मनन्यधीः ॥ यः पठेच्छृणुयाद्वापि तस्य पुण्यं वदाम्यहं ॥३८॥ कुरुक्षेत्रादिनिखिलपुण्यतीर्थेष्वनेकशः ॥
आत्मतुल्यं धनं सूर्यग्रहणे सर्वतोमुखे ॥३९॥ विप्रेभ्यो व्यासतुल्येभ्यो दत्वा यत्फलमश्नुते ॥ तत्फलं सं
भवेत्तस्य सत्यं सत्यं न संशयः ॥४०॥ योगायते मुदाध्यात्मरामायणमहर्निशं ॥ आज्ञां तस्य प्रतीक्षंते
देवा इंद्रपुरोगमाः ॥४१॥ पठन्नस्य सहमध्यात्मरामायणमनुव्रतः ॥ यद्यत्करोति तत्कर्म ततः कोटिगुणं भवे
त् ॥४२॥ तत्र श्रीरामहृदयं यः पठेत्सुसमाहितः ॥ स ब्रह्मघ्नोपि पूतात्मा त्रिभिरेव दिनैर्भवेत् ॥ श्री ॥४३॥
रामहृदयं यस्तु हनुमत्प्रतिमांतिके ॥ त्रिःपठेत्तस्य हं मौनी स सर्वेप्सितभागभवेत् ॥४४॥ ॥ ॥ ॥ राम०
५

जनकत्वं सूचितं ॥४०॥ गायते इति पाठे तु अर्थः योगायतिमुदेति पाठस्तु युक्त एव ॥४१॥ अनुव्रतः तत्परः ॥ स्वभावक्रि
यमाणकर्मणः ॥४२॥ तत्र ध्यात्मरामायणमध्ये ॥ सुसमाहितः स्थिरचित्तः ॥४३॥ प्रतिमांतिके प्रतिमासमीपे ॥४४॥

यस्तुलस्यादिसंनिधौ रामहृदयं पठन् ॥ प्रकुर्वीत प्रदक्षिणादीतिशेषः सप्तसप्तक्षरप्रसप्तस्वरोच्चारणं ब्रह्महत्यां तज्जन्यं
पापं निवर्त्तयेत् ॥ आत्मनः श्रोतुश्चेतिशेषः ॥४४॥ अहंब्रह्मा ॥४६॥ यत्तरामगीतामहात्म्यं ॥४७॥ रामगीतापठ्यमानेतिशे
षः कदाचिन अविग्रहादिकालेपि स्नानादिनेतिशेषः ॥४७॥ मार्गमाण अन्वेषयन्नपितत् ॥ रामगीतातुल्यतया पापना

पठन्श्रीरामहृदयं तुलस्यश्वत्थयोर्यदि ॥ प्रसप्तक्षरं सकुर्वीत ब्रह्महत्यां निवर्त्तयेत् ॥४५॥ श्रीरामगीतामा
हात्म्यं कृत्स्नं जानाति शंकरः ॥ तदर्द्धं गिरिजा वेत्ति तदर्द्धं वेद्म्यऽहं मुने ॥ तत्ते किंचित्प्रवक्ष्यामि कृत्स्नं ॥४६॥२
वक्तुं न शक्यते ॥ यज्ज्ञात्वा तत्क्षणाल्लोकश्चित्तशुद्धिमवाप्नुयात् ॥४७॥ श्रीरामगीता यत्पापं न नाश
यति नारद ॥ तन्न नश्यति तीर्थादौ लोके क्वापि कदाचन ॥ तन्न पश्याम्यहं लोके मार्गमाणोपि सर्वदा ॥४८॥
५ मु रामेणोपनिषत्सिंधुमुन्मथ्योत्पादितां मुदा ॥ लक्ष्मणायार्पितां गीतासुधां पीत्वामरो भवेत् ॥४९॥ जमदग्नि
सुतः पूर्वं कार्त्तवीर्यवधेच्छया ॥ धनुर्विद्यामभ्यसितुं महेशस्यांतिके वसन् ॥५०॥ अधीयमानां पार्वत्या रा
मगीतां प्रयत्नतः ॥ श्रुत्वा गृहीत्वा श्रुपठन्नारायणकलामगात् ॥५१॥ ब्रह्महत्यादिपापानां निष्कृतिं यदि ॥५२॥
वांछति ॥ रामगीतां सकृन्मात्रं पठित्वा मुच्यते नरः ॥

तत्कं वस्तु रामगीतातिरिक्तं न पश्यामीत्यर्थः ॥ गीतां सुधामिति रूप
कं अमृतरूपां गीतामित्यर्थः ॥ अमरस्तत्तुल्यः कार्त्तवीर्यः ॥ सहस्रबाहुरर्जुनः अवरेणोत्तरं ग्रहणं नारायणं कलां ॥ ना
रायणरूपत्वं ॥५१॥ ॥ ॥ ॥

अध्यात्म रामायण

रा॰अ॰बा॰
६

दुःप्रतिग्रह इति दुःप्रतिग्रहस्तिलधेनुर्गजो वाजी प्रेतान्नमजिनं मणिः ॥ मणिः शालग्रामः सुरभिः सूयमाना च घोरः सप्त प्रतिग्रहा इत्यादिस्मृत्युक्तः दुर्भोज्यं निषिद्धभक्षणं दुरालापोनृतभाषणादिः ॥५३॥५४॥५५॥५६॥ न दानाद्यनंतफलं लभेत् । अनंतफलदानादिफलभागे तदध्ययनमात्रेण भवेदित्यर्थः ॥५७॥ श्रुतिर्वेदः स्मृतिर्मन्वादिप्रणीताः पुराणानि पाद्मादीन्य-

दुःप्रतिग्रहदुर्भोज्यदुरालापादिसंभवं ॥ पापं यत्तत्कीर्तनेन रामगीता विनाशयेत् ॥५३॥ शालिग्रामशिलाग्रे
च तुलस्यश्वत्थसंनिधौ ॥ यतीनां पुरतस्तद्वद्रामगीतां पठेत्तु यः ॥ स तत्फलमवाप्नोति यद्वाचोपि न गोचरं
रामगीतां पठन्भक्त्या यः श्राद्धे भोजयेद्द्विजान् ॥ तस्य ते पितरः सर्वे यांति विष्णोः परं पदं ॥५५॥ एकादश्यां
निराहारो नियतो द्वादशीदिने ॥ स्थित्वागस्त्यतरोर्मूले रामगीतां पठेत्तु यः ॥ स एव राघवः साक्षात्सर्वदेवै
श्च पूज्यते ॥५६॥ विना दानं विना ध्यानं विना तीर्थावगाहनं ॥ रामगीतां नरोधीत्य तदनंतफलं लभेत् ५७
बहुना किमिहोक्तेन शृणु नारद तत्वतः ॥ श्रुतिस्मृतिपुराणेतिहासागमशतानि च ॥ अर्हंति नाल्पाम
ध्यात्मरामायणकलामपि ॥५८॥

ष्टादश इतिहासो भारतादिः ॥ आगमाः पंचरात्रादयः ॥ अध्यात्मरामायणस्य तदध्ययनस्य कलां षोडशांशमपि नार्हंति तदध्ययनानीत्यर्थः ॥ सर्वाध्ययनफलत्वादस्येति भावः ॥५८॥ ॥०॥ ॥०॥ ॥०॥ ॥०॥ ॥०॥ ॥०॥

॥५४॥२

राम॰
६

पठंतीत्यत्र उक्तमाहात्म्याध्यायः कर्मः ॥५९॥ इति श्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिविरुदावलीविराजमानस्यहि
न्मतिवर्मणः पुत्रस्य श्रीरामवर्मणः कृतौ अध्यात्मरामायणसेतौ बालकांडे तन्माहात्म्याध्यायः ॥ रामचंद्राय नमः ॥ शिवपा
र्वतीसंवादरूपमध्यात्मरामायणं वक्तुं भगवान्व्यासो निर्विघ्नार्थं भगवत्स्मरणरूपं मंगलमाचरति य इति पृथ्व्यायो दुष्टरा
क्षसादिजनितो भरो भारस्तस्य वारणायेत्यर्थः ॥ परित्राणाय साधूनां विनाशाय च दुष्कृतां ॥ धर्मसंस्थापनार्थाय संभवामि
युगे इति भगवदुक्तेः दिविजैर्देवैः रावणपीडितैः संप्रार्थितः सन् चिन्मयोपि रूपोपि अव्ययोपि पृथ्वीतले रविकुले मायामनु

अध्यात्मरामचरितस्य मुनीश्वरेण यन्माहात्म्यमेतदुदितं कमलासनेन ॥ यः श्रद्धया पठति वा शृणुयात्समर्त्यः
प्राप्नोति विष्णुपदवीं सुरपूज्यमानः ॥५९॥ इति श्रीब्रह्मांडपुराणे उत्तरखंडे एकषष्टितमोध्यायः ॥६१॥ यः
पृथ्वीभरवारणाय दिविजैः संप्रार्थितश्चिन्मयः संजातः पृथिवीतले रविकुले मायामनुष्योव्ययः ॥ निश्च
क्रं हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां कीर्त्तिं पापहरां विधाय जगतां तं जानकीशं भजे ॥१॥ ॥ ॥

ष्यः संजातः तन्नदेवप्रार्थनया यमवतार इत्यर्थे वाल्मीकीये बालकांडे पंचदशषोडशसर्गयोः स्पष्टमेव अव्ययस्य चि
न्मयस्य च कथं जन्म जातस्य च कथमव्ययत्वमुत्पन्नभावस्य नाशावश्यंभावादत उक्तं मायेति मायानाम सत्वासत्वाभ्या
मनिर्वाच्या सत्वरजस्तमोगुणाऽघटितघटिनासामर्थ्यवती काचिदीश्वरशक्तिः देवात्मशक्तिं स्वगुणैर्निगूढामिति श्रुतेर्दै
वी ह्येषा गुणमयी मम माया दुरत्ययेति गीतोक्तेश्च ॥ एवं च चिन्मयस्याघटितोपि मनुष्यभावो जन्मव्यवहारश्च मायाकृत
इति भावः ॥ तदुक्तं रामतापनीयोपनिषदि चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः ॥ उपासकानां कार्यार्थं ब्रह्मणो रूपक

ल्पनेति ॥ निश्चक्रं निरवशेषं यथा तथा हतराक्षसः
जगतां पापहरां स्थिरां कीर्त्तिं विधाय लोके स्थाप
यित्वा पुनराद्यं ब्रह्मत्वं निरूपाधिब्रह्मरूपमगात् ॥१॥

णमस्योक्तं ब्रह्मत्वं लक्षणैर्दर्शयति विश्वेति विश्वस्य संसारस्योत्पत्तिलयादिषु मेकं हेतुं यतो वा इमानि भूतानि जायंते येन जा
तानि जीवंति यत्प्रयंत्यभिसंविशंतीति श्रुतेः प्रयंति यत्र लीनानि भवंतीत्यर्थः ॥ अनेन निमित्तकारणत्वसमानाधिकरणं
जगदुपादानकारणत्वं ब्रह्मलक्षणं सूचितं एकमित्सहायार्थकं तेन न निमित्तकारणभेदः सूचितः । ननु मिथ्याभूतका
र्यनिरूपितकारणत्वस्यापि मिथ्यात्वाद्ब्रह्मणसंबंधाभावात्कथमस्य लक्षणत्वमत आह मायाश्रयमिति मायाश्रयत्वा
त्तत्कृतमिदमस्य कारणत्वमित्यर्थः । मायिकेन कारणत्वेन मायिक एव ब्रह्मणः संबंध इति भावः । तदुक्तं श्रुतौ मायां तु
प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति ननु मायाश्रयत्वे जीवं प्रति स्वस्वरूपमिव स्वं प्रत्यपि एतं माया आवृणुयात आह

विश्वोद्भवस्थितिलयादिषु हेतुमेकं मायाश्रयं विगतमायमचिंत्यमूर्त्तिं ॥ आनंदसांद्रममलं निज
बोधरूपं सीतापतिं विदिततत्त्वमहं नमामि ॥२॥

विगतमायमिति विगता माया वरणशक्तिरूपा यस्मात्तं एनं प्रति स्वस्वरूपावरणशक्तिरहितासेत्यर्थः अचिंत्यमू
र्त्तिं ॥ यतो वाचो निवर्त्तंते ऽप्राप्य मनसा सहेति श्रुतेः ॥ एवं जगदुत्पत्त्यादिकारणरूपं तटस्थलक्षणमुक्तं तेन रूपेण
ज्ञेयत्वात् ॥ अथ स्वरूपलक्षणमाह ॥ आनंदसांद्रममलं निजबोधरूपमिति ॥ सत्यं ज्ञानमानंदं ब्रह्मेति श्रुतेः इदमे
व ज्ञेयं रूपं अमलं उपाधिकृतदोषरहितं जीवस्तूपाधिकृतकर्तृत्वाद्यभिमानवान् ॥ तथा नेश्वर इति भावः निजं स्वाभावि
कं बोधरूपमेव यस्य तं ॥ अनेन रूपांतरं सर्वं मायिकमिति सूचितं विदिततत्त्वं ॥ ज्ञातं स्वस्य बोधस्वरूपत्वं येन तं तेन रामा
वतारे शोकक्रोधादिनटवन्नटनमात्रमिति सूचितं ॥ २ ॥

हरिमेव हरिसायुज्यमेव ॥३॥ यः शृणुयात्स सहस्रगुणितात्पुनात्तद्गुणितकोटिसंख्यगोदानादधिकं फलं लभेदित्यन्वयः ॥४॥ पुरारि
गिरीति रामार्णवेति च रूपके ॥ अध्यात्मरामगंगेति अध्यात्मरामशब्दोऽध्यात्मरामायणपरस्तदेव गंगेति अनेन रूपकेण सर्वम
हापातकादीनामपि नाश इति सूचितं ॥ गंगायास्तन्नाशकत्वस्य सर्वश्रुतिस्मृतिसिद्धत्वात् ॥५॥ सकलमलहरवक्तृविषयत्वा
द्वाक्यस्य सकलमलहरत्वं ॥ आनंदकंदमिति च विशेषणं । एतस्यैवानंदस्य मात्रामुपजीवंतीति श्रुतेरस्य सर्वानंदमूलत्वेना

पठंति ये नित्यमनन्यचेतसः शृण्वंति चाध्यात्मिकसंज्ञितं शुभं ॥ रामायणं सर्वपुराणसंमतं निर्धूत
पापा हरिमेव यांति ते ॥३॥ अध्यात्मरामायणमेव नित्यं पठेद्यदीच्छेद्भवबंधमुक्तिं ॥ गवां सहस्रायुत
कोटिदानात्फलं लभेद्यः शृणुयात्स नित्यं ॥४॥ पुरारिगिरिसंभूता श्रीरामार्णवसंगता ॥ अध्यात्मराम
गंगेयं पुनाति भुवनत्रयं ॥५॥ कैलासाग्रे कदाचिद्रविशतविमले मंदिरे रत्नपीठे संविष्टं ध्याननि
ष्ठं त्रिनयनमभयं सेवितं सिद्धसंघैः ॥ देवी वामांकसंस्था गिरिवरतनया पार्वती भक्तिनम्रा । प्राहेदं
६ पार्वत्युवाच ॥ देवमीशं सकलमलहरं वाक्यमानंदकंदं ॥६॥ नमोऽस्तु ते देव जगन्निवास सर्वात्मदृक् त्वं परमेश्वरो
सि ॥ पृच्छामि तत्त्वं पुरुषोत्तमस्य सनातनं त्वं च सनातनोसि ॥७॥

नंदकंदत्वं ॥६॥ देवो द्योतनात् ॥ जगन्निवासस्मिन् जगति विनिवसतीति वा जगन्निवासस्तस्य संबुद्धिः । ते तुभ्यं नमः अस्तु
यतस्त्वं सर्वात्मकदृक् सर्वस्वरूपा आत्मा सर्वात्मा ब्रह्म । सर्वं खल्विदं ब्रह्मेति श्रुतेः । तमनिशमात्मस्वरूपतया पश्यतीति स
र्वात्मदृक् ॥ अत एव परमेश्वरोसि अतः । पुरुषोत्तमस्य सर्वेभ्यः ॥ पुरुषेभ्य उत्तमस्य तस्यैव ब्रह्मणः । सनातनं उपाधिर
हितं सोपाधेरूपस्य ज्ञानोत्तरं नाशान्न सनातनत्वं तत्त्वं पृच्छामि ॥ नन्वसनातनेन मया कथं तत्त्वं शक्यमत आह त्वं च
सनातनोसि त्वमपि स एवासीति त्वदज्ञातं न किंचिदि
ति भावः ॥७॥

अस्तंतगोप्यं। इदंतुतेगुह्यतममितिगीतोक्तेः अनन्यवाच्यंभक्तान्येषुवक्तुमयोग्यं अहोतदपिभक्तेषुवदंति अतोमेदृष्टंय
त्ततुनिश्चयेनवदहेदेवयतोहंतवभक्तानानुमभट्क्तावंकुतस्तत्राहयतस्त्वंमेप्रियोसि॥८॥ज्ञानमितियेनजातेनजनास्तरं
निपुनर्जन्मादिसंसारंनप्राप्नुवंतितत्सविज्ञानंज्ञानंब्रूहि॥विज्ञानंनिदिध्यासनपरिपाकजमपरोक्षज्ञानंतत्सहितंत
त्फलकमितियावत् ज्ञानंश्रवणमननजंपरोक्षंब्रह्मैवसर्वंब्रह्मैवाह॥मितिच॥तरतिशोकमात्मविदितिश्रुतेः त
द्रहितज्ञनकवाक्यंब्रूहीत्यर्थः॥तत्ज्ञानंचनवैराग्यविनावैराग्यंचनभक्तिंविनेत्यतआह॥अनुभक्तिवैराग्य

गोप्यंयदत्यंतमनन्यवाच्यंवदंतिभक्तेषुमहानुभावाः॥तदप्यहोहंतवदेवभक्तःप्रियोसिमेत्वंवद
यत्तुदृष्टं॥८॥ज्ञानंसविज्ञानमथानुभक्तिवैराग्ययुक्तंचमितंविभास्वत्॥जानाम्यहंयोषिदपित्वदुक्तं
यथातथाब्रूहितरंतियेन॥९॥पृच्छामिचान्यच्चपरं रहस्यंतदेवचाग्रेवदवारिजाक्ष॥श्रीरामचंद्रेखि
लतत्वसारेभक्तिर्दृढानौर्भवतिप्रसिद्धा॥१०॥

युक्तंचेतिभक्तेःपश्चादनुभक्तिज्ञायमानंयद्वैराग्यंतद्युक्तं॥तदुपायबोधकवाक्ययुक्तंचेत्यर्थः॥तथाचपातंजले
सूत्रंदृष्टानुश्रविकविषयवितृष्णस्यवशीकारसंज्ञावैराग्यमिति अनुश्रवोवेदस्तद्बोधितः॥स्वर्गादिरानुश्रविकःभ
क्तिरीश्वरानुरागः॥तथामितंमितशब्दवत्॥विभास्वत्॥विशेषेणभास्वत्॥श्रुतिमात्रेणस्फुरदितीत्यर्थः प्रसाप
कशब्दयुतंबोधजनकवाक्ययुक्तं॥ब्रूहियथायोषिदप्यहंत्वदुक्तं॥जानामि॥९॥अग्रेप्रथमतः॥दृढाभक्तिः॥
प्रसिद्धानौर्भवतिभवसागरतारणायेतिशेषः॥१०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तदेवाह भक्तिरिति ततोन्यत्साधनं नास्ति अन्यद्धर्मादिति तत्साधनं भवमोक्षजनकत्वज्ञानसाधनं नास्तीत्यर्थः सा मुख्येतरापे
क्षितत्वात्। भक्तिः परानुरक्तिरीश्वरे इति भक्तिमीमांसाकृच्छांडिल्यसूत्राभ्यां इतरेण ज्ञानेन स्वसाधनतयापेक्षितत्वात्सा भक्ति
र्मुखेसाधसूत्रार्थः भक्तिलक्षणयस्व द्वितीयसूत्रं। हृत्संग्रायवंधनं हृद्गतसंशयविषयं रागमस्यानीश्वरत्वं॥११॥ निरस्तस्व
त्वोमायागुणसत्वादिकृतोरागद्वेषादिसंप्रवाहो येन तं॥ अप्रमत्ताः प्रमादोऽज्ञानं तद्रहिताः प्रमादं वैमत्युमहं ब्रवीमीति
सनत्सुजातोयोक्तेः। तत्र हि मत्युवैंतमइतिश्रुतेर्मृत्युपदेनाज्ञानमिति बोध्यं तथैव॥ तेन प्रकारेण भजनेनैव सिद्धास्तव

भक्तिः प्रसिद्धा भवमोक्षणाय नान्यत्ततः साधनमस्ति किंचित्॥ तथापि हृत्संग्रायबंधनं मे विभेत्तुमर्हस्य
मलौक्तिभिस्त्वं॥११॥ वदंति एमं परमेकमाद्यं निरस्तमायागुणसंप्रवाहं॥ भजंति चाह निपुणमप्रमत्ताः परं
पदं यांति तथैव सिद्धाः॥१२॥ वदंति केचित्परमोपि रामः स्वाविद्यया संवृतमात्मसंज्ञं॥ जानाति नात्मानम
तः परेण संबोधितो वेद परात्मतत्वं॥१३॥

ज्ञाः संतः परपदं मोक्षं यांति॥१२॥ परमोपि रामः। स्वाविद्यया मायया संवृतमावृतं॥ आत्मसंज्ञं। ब्रह्मसंज्ञं आत्मानं स्वस्वरूपं
न जानाति अतः। परेण ब्रह्मणा संबोधितः परात्मा ईश्वरस्तद्रूपं स्वतत्वं वेद जानाति केचिद्वदंति तथा च वाल्मीकीये राव
णवधानंतरं ब्रह्मवाक्यंनमुवाच ततो देवः स्वयंभूरमितद्युतिः॥ भगद्यरुचिरवाहुं स्मारयन्सर्वदेहिकं भवावामूनारामा
यणः॥ साक्षाद्देवश्चक्रायुधः प्रभुरित्यादि॥ उपदेशेसाहस्त्यां भगवत्यादैरप्युक्तं॥ ब्रह्माद्याः सरस्ये यद्दृक्तैर्वार्युनुगादत्तमः

तस्य विष्णुत्वसंबोधेन मतांतरमास्थित इति॥१२॥

सीतानिमित्तविलापः सचारण्यककांड किष्किंधादौ वाल्मीकीये स्पष्ट एव ॥ केन सेव्यः । अज्ञस्य जीववत्सेव्यत्वाचेत्यर्थः ॥१४
१५ ॥ परमात्मनो ब्रह्मणः ॥ १६ ॥ एवं पार्वत्या पृष्टः शिवो रामरूपमाह रामइति ॥ रामः परात्मा ब्रह्मैवेत्यर्थः प्रकृतेरित्यस्य अन्य इति
असंसर्गीति च शेषः प्रकृतितत्कार्येभ्यो न्यत्वात्तैरसंसर्गीच्च रामः ॥ परमेश्वर एवेत्यर्थः ॥ जीवस्तु तैरुपाधिभिः संस्पृष्टस्तद्ध-
र्मकर्तृत्वाद्यभिमानवानिति भावः ॥ अत एवानादिरेक आनंदः कार्यानंदव्यावृत्तये ऽनादिरिति एवं चानंदं ब्रह्म एकमेवाद्वि-
तीयं ब्रह्मेतीति श्रुतिसिद्धं ब्रह्मेत्यर्थः ॥ अत एव पुरुषोत्तमः पुरुषेभ्यो जीवेभ्य उत्तमः हि प्रसिद्धमेतदित्यर्थः ॥१७॥ नन्वी-

यदि स जानाति कुतो विलापः सीताकृते तेन न कृतः परेण ॥ जानाति नैवं यदि केन सेव्यः समो हि स वैरपि जी-
वजातैः ॥१४॥ अत्रोत्तरं किं विदितं भवद्भिस्तद्ब्रूत मे संशयभेदि वाक्यं ॥१५॥ **श्रीमहादेव उवाच** ॥ धन्या-
सि भक्तासि परात्मनस्त्वं यज्ज्ञातुमिच्छा तव रामतत्त्वं ॥ पुरा न केनाप्यभिचोदितोहं वक्तुं रहस्यं परमं निगू-
ढं ॥१६॥ त्वयाद्य भक्त्या परिनोदितोहं वक्ष्ये नमस्कृत्य रघूत्तमं ते ॥ रामः परात्मा प्रकृतेरनादिरानंद एकः
पुरुषोत्तमो हि ॥ स्वमायया कृत्स्नमिदं हि सृष्ट्वा नभोवदंतर्बहिरास्थितो यः ॥ दृशस्य मनुष्यादिदेहधारणं कथ-

मत आह ॥ स्वमाययेति अघटितघटनाशक्तिरूपया मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुतिसिद्धतया इ-
दं कृत्स्नं दृश्यं सृष्ट्वांतर्बहिरवस्थितो यः तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः ॥ तादृशस्य मनुष्यशरीरपरिग्रहो नाश्चर्यं
तदुक्तं गीताभाष्ये भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोपि स्वमायया देहवानिव जात इव च लोकानुग्रहं कुर्वन्न

॥ लक्ष्यते स्वप्रयोजनाभावेपि भूतानुजिघृक्षयेत ॥

नन्वेवं सर्वगतत्वे सर्वज्ञेयः किं नेत्यत आह सर्वांतरस्थोपि निगूढ आत्मेति यः । पृथिव्यां तिष्ठन्पृथिव्या अंतर इत्यादिश्रुत्या सर्वांतरस्थत्वेनोक्तोपि निगूढः । एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति श्रुतेः ॥ तादृशस्य सत्वे व्यवहारकालिकमपि मानमाह स्वमाययेति ॥ स्वज्ञानकल्पितया माययेत्यर्थः ॥ अयं भावः नित्यशुद्धादिरूपे स्वस्वरूपाज्ञानेन तस्या घटितघटनासामर्थ्यापरपर्यायमायाख्या त्रिगुणशक्तिरूपाधिकल्पितावच्छेदैस्तत्स्वरूपैर्जीवैः ॥ कल्पिता सा च स्वस ॥ जातीयमेव संसारमुद्गाढं च प्रसूते । अत एव तत्स्वरूपज्ञाने सकार्यायास्तस्या नाशः रज्जुज्ञानेनेव रज्जुकल्पितभुजंगस्य भयकंपादिकार्यसहितस्य न च जीवैः ॥ स्वस्वकल्पना तत्सृष्टोपाधिभिश्च जीवतेत्यन्योन्या

॥ सर्वांतरस्थोपि निगूढ आत्मा स्वमायया सृष्टमिदं विचष्टे ॥ १८ ॥

अयः अनादित्वेन परिहारात् ॥ नन्वेकस्यात्तत्त्वज्ञानेन तन्नाशेऽसंसारोच्छेदापत्तिः ॥ एकरज्जौ युगपद्दशानां सर्पभ्रमे एकस्य रज्जुज्ञानेन तस्य सर्पभ्रमे तत्कार्ये भयकंपादौ निवृत्तेपि अन्येषां तद्दर्शनेन तदनिवृत्तिवदुपपत्तेरिति तया सृष्टमिदं विचष्टे पश्यति ॥ एवं च द्रष्टत्वेन तत्सिद्धिः नान्योस्ति द्रष्टेति श्रुतेः ॥ एकेनैवाकाशेनोपाधिभेदात् घटाकाशादिव्यवहारवत् ॥ एकेनैव चेतनेनोपाधिभेदादनेकजीवव्यवहारोपपत्तौ चेतनानेकत्वे मानाभावात् ॥ द्रष्टत्वेन तत्सिद्धिरिति भावः ॥ न च तत्तदज्ञानरूपोपाधिविशिष्टस्यैव जीवत्वे जीवस्याज्ञानमिति व्यवहारानापत्तिः ॥ भार्याविशिष्टस्यैव गृहस्थत्वेपि गृहस्थस्य भार्येति तदुपपत्तेरिति दिक् ॥ १८ ॥ ॥

चेतनस्वीकारे मानांतरमाह जगंतीति ॥ जगंति जगदंतःकरणानि यत्संनिधौ निःसं परितो भ्रमंति स्वस्वचेष्टां कुर्वंति अन्यथा सर्वस्य जडत्वाच्चेतनाभावे जगदांध्यप्रसंग इति भावः ननु निष्कलं निष्क्रियं शांतमिति श्रुतेस्तस्य निष्क्रियतया कथं तेनान्येषां व्यापारसंपादनमत आह । चुंबकलोहवद्धीति यथा निष्क्रियोपि चुंबकमणिर्लोहं शक्तिविशेषात्संनिधिमात्रेण चालयति तथा चेतनो निष्क्रियोपि स्वमायावैचित्र्यादेतानि संनिधिमात्राद्व्यापारयतीत्यर्थः ॥ तदुक्तमाचार्यैरगायन्नविकारः सन्नयस्कांतवदेव यः बुध्यादींश्चालयेत्प्रत्यक् सोहमित्यवधारयेत् इति एतत्तु मायागुण

जगंति निःसं परितो भ्रमंति यत्संनिधौ चुंबकलोहवद्धि । एतन्न जानंति विमूढचित्ताः स्वाविद्यया संवृतमानसा ये ॥१९॥ स्वाज्ञानमप्यात्मनि शुद्धबुद्धे स्वारोपयंतीह निरस्तमाये ॥ संसारमेवानुसरंति ते वै पुत्रादिसक्ताः पुरुकर्मयुक्ताः ॥२०॥

॥ स्रष्टृत्वादिरूपं ये जीवा न जानंति अज्ञाने हेतुर्विमूढचेतसः विमूढचेतस्त्वे हेतुः । स्वाविद्यया संवृतमानसा इति स्वोपाधिभूतया अविद्यया विद्याविरोधाभावादार्ध्यरूपया संवृतांतःकरणाः । अतस्ते जीवाः शुद्धबुद्धे शुद्धत्वं मायादोषानाक्रांतत्वेन । बुद्धे ज्ञानस्वरूपे निरस्तमाये स्वज्ञानवत्तां निरस्ता माया येन तादृशे मामेव ये प्रपद्यंते मायामेतां तरंति ते ॥ इति गीतोक्तेः ॥ ईदृशे रामे ॥ स्वाज्ञानं सुतरामारोपयंति स्वयमज्ञत्वान्मामज्ञमिति जानंतीत्याशयः ॥ तेषां दुष्टफलमाह ॥ संसारमिति ते पुत्रादिसक्ताः पुरुकर्मयुक्ताः

पुत्रादिसक्ताः पुरुकर्मयुक्ताः संसारमेवानुसरंति ॥२०॥

पतस्ते यथाऽज्ञाः कंठगतं चामीकरं स्वर्णालंकारं यथा न जानंति एवं हृदयस्थितं रामं तेन जानंति अतः संसारमेवानुसरंतीत्यर्थः किं
च परमात्मन्यज्ञानासंभव इति दृष्टं तेनाह यथेति॥ अप्रकाशो स्तमो यथा रवौ ज्योतिः स्वभावे ज्योतिः स्वरूपे न विद्यते यथा विशु
द्धविज्ञानेन निर्विशेषापरोक्षज्ञानेन घने निविडे परतः उत्कृष्टेभ्योप्युत्कृष्टे रामे अविद्या कथं स्यात्॥ तादृशे वस्तुन्यविद्यानवका
शादिति भावः॥ तदुक्तमाचार्यैः॥ अप्रकाशो यथादित्ये नास्ति ज्योतिः स्वभावतः॥ नित्यबोधस्वरूपत्वान्नाज्ञानं तद्वदात्मनीति॥२१॥
ननु स्वज्ञानेन राममज्ञं व्यवहारति जन इत्युक्तमसंगतं॥ अन्यगतस्यान्यत्रारोपासंभवादित्याशंक्य सदृष्टांतं तथा मोहं जीवे उपपा

जानंति नैवं हृदये स्थितं वै चामीकरं कंठगतं यथाऽज्ञाः॥ यथाऽप्रकाशो न तु विद्यते रवौ ज्योतिःस्वभावे परमे
श्वरे तथा॥ विशुद्धविज्ञानघने रघूत्तमेऽविद्या कथं स्यात्परतः परात्मनि॥२१॥ यथा हि चाक्ष्णा भ्रमता गृहा
दिकं विनष्टदृष्टे र्भ्रमतीव दृश्यते॥ तथैव देहेंद्रियकर्तुरात्मनः कृतं परेऽध्यस्य जनो विमुह्यति॥२२॥

ह्यति॥ यथा विनष्टदृष्टेर्दोषयुक्तदृष्टेः पुरुषस्य भ्रमताक्ष्णा गृहादिकं भ्रमतीवो लोकेक्षेयं भ्रमतीवेति गृह्यते तेनैव नष्ट
दृष्टिना पुरुषेणेति शेषः॥ तथैव देहेंद्रियावच्छिन्नस्य कर्तुरात्मनोंतःकरणस्याहंकाराख्यस्य कृतं परे सर्वधर्माक्लिसेत
द्वच्छिन्ने चेतनेऽध्यस्य जनो जीवो मुह्यति अहं कर्त्तेति मोहं॥ प्राप्नोति एवं च यथाक्षिगतभ्रमणस्य गृहादावारोपः यथा चां
तःकरणधर्मस्य कर्तृत्वादेरात्मन्यारोपस्तथा स्वाज्ञानस्य रामे आरोप इत्याशयः॥२२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रा०अ०व्या०
११

भगवति रामे स्वतोऽज्ञानमसंभवीति पुनरपि दर्श्योपोक्तयुक्त्यैवाहनाहइति ॥ सूर्ये प्रति रात्रिदिवसविभागाभावे हेतुः प्रकाशरूपाव्य
भिचारतः क्वचित् क्वापीत्यर्थः ज्ञानाज्ञानयोर्भगवत्यनवस्थितौ हेतुः शुद्धचित्घनत्वं ॥२३॥ उपसंहरति तस्मादिति परानंदमये
सर्वभूतैरेतदानंदमात्राया उपजीवनात् ॥ विज्ञानरूपे निर्विकल्पज्ञानरूपे तयोऽज्ञानरूपं तमोऽसंबंधे हेतुद्वयमज्ञानसाक्षि
त्वं ॥ मायाधिष्ठातृत्वरूपं मायाश्रयत्वं च कीदृक् तमः मोहकारणं तमोऽज्ञानं यो यन्मायापाधिष्ठाता स तद्विषयाज्ञानहीन
इति लोके दर्शनादिति भावः नन्वेवं सति ब्रह्मादाशरथेर्यद्दुःखदुःखैर्वायानुदत्तमद्दस्याचार्याद्युक्तेः ॥ का गतिरिति चेत्

नाहो न रात्रिः सवितुर्यथा भवेत्प्रकाशरूपाव्यभिचारतः क्वचित् ॥ ज्ञानं तथाज्ञानमिदं द्वयं हरौ रामे क
थं स्थास्यति शुद्धचिद्घने ॥२३॥ तस्मात्परानंदमये रघूत्तमे विज्ञानरूपे हि न विद्यते तमः ॥ अज्ञानसा
क्षिण्यऽरविंदलोचने मायाश्रयत्वान्न हि मोहकारणं ॥२४॥ अत्र ते कथयिष्यामि रहस्यमपि दुर्लभं
सीताराममरुत्सूनुसंवादं मोक्षसाधनं ॥२५॥ पुरा रामायणे रामो रावणं देवकंटकं ॥ हत्वा रणे रणश्ला
घी सपुत्रबलवाहनं ॥२६॥ सीतया सह सुग्रीवलक्ष्मणाभ्यां समन्वितः ॥ अयोध्यामगमद्रामो हनुमत्प्र
मुखैर्वृतः ॥२७॥

शृणु ॥ रावणवधार्थं मनुष्यत्वनाटनाय भगवता संकल्पपूर्वं कृतस्य स्वमाहात्म्याच्छादनस्य तत्र तमःशब्देनोक्तेरदोषात्
उक्तं हि संक्षेपशारीरके संकल्पपूर्वकमभूद्रघुनंदनस्य नाहं विजान इति कंचन कालमेतत् ॥ ब्रह्मोपदेशमुपलभ्य निमि
त्तमात्रं तद्धोत्ससर्ज सकृते सति देवकार्ये इति भागवतेप्युक्तं स्त्रीसंगिनां गतिरिति प्रथयांचकारेति ॥२४॥ मरुत्सूनुर्वायुपुत्रो
हनूमान् ॥२५॥ रामायणे रामायणप्रवृत्तिके रामावतारकाले इत्यर्थः देवकंटकं देवद्रोहिणं ॥२६॥२७॥

राम०
११

परिवृतः। सीतादिभिरिति शेषः ॥२८॥ पुरतः स्थितं। अनेन गुरूपसनं नं दर्शितं। निराकांक्षां ज्ञानेतरधनादिनिरपेक्षं ॥२९॥ तत्वं
मस्वरूपतत्वं निष्कल्मषायमिति त्यनेन ज्ञानाधिकारित्वं सूचितं नौ श्रावयोः ॥३०॥ रामस्य न तत्वं श्रोतुर्निश्चितुर्निश्चितं यथा
भवति तथा प्राह लोकविमोहिनीत्यनेन वंधनकर्त्तुरेव वंधविमोके सामर्थ्यमिति दर्शितं ॥ राजाज्ञया वद्धो हि तदाज्ञयैव
मुच्यत इति लोके प्रसिद्धं एवं च भगवतीरूपैव मुख्यं मोक्षकारणमिति दर्शितं ॥३१॥ जानकी प्राहेत्युक्तं तदाह। राममि

अभिषिक्तः परिवृतो वसिष्ठाद्यैर्महात्मभिः ॥ सिंहासने समासीनः कोटिसूर्यसमप्रभः
॥२८॥ दृष्ट्वा तदा हनूमंतं प्रांजलिं पुरतः स्थितं ॥ कृतकार्यं निराकांक्षं ज्ञानापेक्षं महामतिं
॥२९॥ रामः सीतामुवाचेदं ब्रूहि तत्वं हनूमते ॥ निःकल्मषोयं ज्ञानस्य पात्रं नौ नित्यभक्तिमा
न् ॥३०॥ तथेति जानकी प्राह तत्वं रामस्य निश्चितं ॥ हनूमते प्रपन्नाय सीता लोकविमोहि
नी ॥३१॥ सीतोवाच ॥ रामं विद्धि परं ब्रह्म सच्चिदानंदमद्वयं ॥ ॥ ॥छ॥ ॥छ॥ ॥छ॥

ति। रामं परं ब्रह्म विद्धि रमंते योगिनोनंते नित्यानंदे चिदात्मनि इति रामपदेनेदं परं ब्रह्माभिधीयत इति तापनीये
पाद्मे चोक्तेः सन्। बाधहीनं सत्त्वं वा धारणं हि सत्वं जगद्बाधैकसाक्षिणः ॥ बाधः किं साक्षिको ब्रूहि न त्वसाक्षिक इष्यत इ
त्युक्तेः चित् ज्ञानस्वरूपं आनंदं तद्रूपं। अद्वयं एकमेवाद्वितीयमिति श्रुतेः ॥ ॥ ॥ ॥ ॥ ॥ ॥

सर्वोपाधिविनिर्मुक्तं ॥ स्थूलसूक्ष्मसकलोपाधिनिर्मुक्तं विराट् हिरण्यगर्भेश्वकारयोश्चेत्युपाधयः ॥ ईशस्य पत्रिभिर्हीनं तुरीयं
तत्सदं विदुरिति वार्त्तिके किंच सर्वोपाधिभिर्धर्मैर्विनिर्मुक्तं मत्स्वरूपमित्यर्थः सत्तामात्रं वस्तुमात्रे सदिति व्यवहारनियामक
मित्यर्थः ॥ एतत्संबंधादेव सर्वत्र सदिति व्यवहार इति भावः ॥ अगोचरं मनोवचसोरविषयमित्यर्थः । यतो वाचो निवर्त्तंतेऽ
प्राप्य मनसा सहेति श्रुतेः ॥ ३२ ॥ आनंदं ॥ तत्वेन विपुलत्वमुपलक्ष्यते ॥ यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति श्रुतेः निर्मलं
रजोहीनं शांतं प्रपंचोपशमत्वात् प्रपंचोपशमं शिवं शांतमिति श्रुतेः ॥ निर्विकारं ॥ जायतेस्ति वर्धते विपरिणमतेऽपक्षी
यते नश्यतीति षड्भावविकारहीनं न जायते म्रियते वितिगीतोक्तेः ॥ अनेनापरिणामित्वं सूचितं निरंजनं ॥ अविद्यातत्का

सर्वोपाधिविनिर्मुक्तं सत्तामात्रमगोचरं ॥ ३२ ॥ आनंदं निर्मलं शांतं निर्विकारं निरंजनं ॥ सर्वव्यापिनमात्मा
((नं स्वप्रकाशमकल्मषं ॥ ३३ ॥

र्यरूपतमोहीनं ॥ आदित्यवर्णं तमसः परस्तादित्युक्तेः सर्वव्यापिनं सर्वव्यापित्वा
देवात्मानं ॥ अतति व्याप्नोतीत्यात्मा सर्वव्यापी भूतांतरात्मेति श्रुतेः स्वप्रकाशं अत्रायं पुरुषः स्वयंज्योतिरिति यस्य भासा
सर्वमिदं विभातीति च श्रुतेः अकल्मषं आत्मापहतपाप्मेति श्रुतेः ॥ सदादिशब्दानां कल्पितप्रवृत्तिनिमित्तभेदप
र्यायत्वेन सह प्रयोगः ॥ यानिस्वभावमुखेन बोधकानि तेषु न काप्यनुपपत्तिः ॥ एवं चोपात्ततः कल्पितप्रवृत्तिनिमित्तप्र
कारकबोधे वृत्ते शुद्धचित्तस्य श्रुतौ सर्वधर्मरहितत्वेन ब्रह्मोक्त्या धर्मांशे कल्पितत्वग्रहे शुद्धनिर्धर्मकब्रह्मबोधः
परैर्भवनीति बोध्यं तत्र दुर्बोधस्यात्मतत्वस्य बोधार्थं पुनः पुनः प्रावृत्तोऽर्थं तस्य परमकरुणावती भगवती सीता

हनूमते बोधयामासेति द्वयं ॥ ३३ ॥

नन्वेवंविधो णमश्चेज्जगत्कारणत्वाद्यसंभवस्तस्मिन्निति कुतो जगदुत्पादी स्यत आह। मामिति। मूलप्रकृतिः सर्वजगदुपाद-
नकारणमित्यर्थः प्रकृतिशब्दस्योपादानकारणे प्रसिद्धेः॥ तत्तदुपादानकारणानां महदादीनामप्युपादानकारणत्वान्मू-
लप्रकृतित्वमस्याः मायां तु प्रकृतिं विद्यादिति श्रुतिप्रसिद्धं ब्रह्मएप धर्मस्तां ततो भेदाभेदाभ्यां सत्वाभ्यां चानिर्वचनीया-
मनादिमैश्वरीं मायां ऐश्वरीत्वं चास्याईश्वरस्वरूपाज्ञानरूपत्वेनेति बोध्यं एषा च जीवाश्रितैवेश्वरं संनिधानात्तद्रूपे-
ण विवर्त्तते इति बोध्यं मूलप्रकृतित्वमेव स्फुटयति सर्गस्थित्यंतकारिणीमिति। उत्पत्तिस्थितिप्रलयकर्त्रीं नन्वेवं तदैक्ष-
त बहुस्यां प्रजायेयेति श्रुतेर्यतो वाइमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति ब्रह्मणः कारणस्य

मां विद्धि मूलप्रकृतिं सर्गस्थित्यंतकारिणीं॥ तस्य सन्निधिमात्रेण सृजामीदमतंद्रिता॥३४॥ ॥

श्रुतेश्च ब्रह्मणो जगत्कारणत्वं लभ्यते तद्विरुध्येतेत्यत आह तस्य संनिधीति यथैंद्रजालिकमायाशक्तेस्तत्तन्मंत्रनिष्ठा-
या ऐंद्रजालिकं विना जगत्कारणत्वे शक्त्येः तत्सन्निधानेनैव जगत्स्रष्टत्वमिति तत्र दुपचारः। यथा गृहिणी वैशिष्ट्य-
नैव सिद्धस्वरूपस्य गृहस्थस्य स्वसंबंधजसंकल्पवशवर्त्तिनी गृहिणी तथा माया वैशिष्ट्येनैव सिद्धस्येश्वरस्य स्वसं-
वाजात्तत्संकल्पवशवर्त्तिन्यहमित्याह॥ आतंद्रिता तत्संकल्पितेऽर्थे निरालस्येत्यर्थः॥ तदुक्तं वाल्मीकीये रामं प्रति का-
लवचनेन संक्षिप्येह परलोकानेकस्त्वं मायया सह भार्यया शुभया देव्या मां त्वं पूर्वमजीजन इति एवं च मत्कृतस्रष्टत्वा-
दिस्तत्रारोप इति भावः॥३४॥ ॥छ॥ ॥ छ ॥ छ ॥ छ ॥ छ॥ ॥

अ॰रा॰बा॰
१२

यद्यपि मायाशबले ईश्वरे एव जगदुपादानत्वं निमित्तत्वं जगतस्तदुपादानं मायाद्यं तामसीं निमित्तं शुद्धसत्वां तामुच
तेत्र सतज्ज्ञैरिति अभियुक्तोक्तेस्तथापि विशिष्टस्य विशेषणविशेष्योभयानतिरेकेण मायागतस्य तस्य भगवत्यारोपेणे

तत्सान्निध्या ऽन्मयासृष्टं तस्मिन्नारोप्यते ऽबुधैः ॥ अयोध्यानगरे जन्म रघुवंशेऽतिनिर्मले ॥३५॥
विश्वामित्रसहायत्वं मखसंरक्षणं ततः ॥ अहल्याशापशमनं चापभंगो महेशितुः ॥३६॥
मत्पाणिग्रहणं पश्चात् भार्गवस्य मदक्षयः ॥ अयोध्यानगरे वासो मया द्वादशवार्षिकः ॥३७॥
दंडकारण्यगमनं विराधवध एव च ॥ मायामारीचमरणं मायासीताहृतिस्तथा ॥३८॥ जटा
युषो मोक्षलाभः कबंधस्य तथैव च ॥ शबर्याः पूजनं पश्चात्सुग्रीवेण समागमः ॥३९॥ वालिन ॥
श्च वधः पश्चात्सीतान्वेषणमेव च ॥ सेतुबंधश्च जलधौ लंकायाश्च निरोधनं ॥४०॥ ॥।।।॥

राम॰
१२

व तथा व्यवहार इत्याह तदिति ॥ यतस्तत्सान्निध्यान्मया सृष्टमतस्तत्सृष्टत्वादि अबुधैस्तत्त्वरूपानभिज्ञैस्तत्रारोप्य
ते रज्जौ सर्प इवेति भावः ॥ एतदेव दृष्टयितुं कानिचित्स्वकृतानि तत्रारोप्याणि दर्शयति ॥ अयोध्येत्यादि ॥३५॥३६॥३७

मायामारीचमरणं॥ मायया गृहीतमृगरूपमारीचमरणमित्यर्थः॥ मायासीताहृतिरिति तदुक्तं कूर्मपुराणे उत्तरखंडे चतु
स्त्रिंशोध्याये एनमस्य सुभगां भार्यां रावणो राक्षसेश्वरः। सीतां विशालनयनां चकमे कालनोदितः। गृहीत्वा मायया वेषं चरं
तीं विजने वने॥ समाहर्तुं मनश्चक्रे तापसः किल कामिनीं॥ विज्ञाय सा च तद्भावं स्मृत्वा दाशरथिं पतिं। जगाम शरणं वह्नि
मावसथ्यं शुचिस्मिता॥ प्रपद्ये पावकं देवं साक्षिणं विश्वतोमुखं। आत्मानं दीप्तवपुषं सर्वभूतहृदिस्थितमित्याद्यष्ट
श्लोकानुक्त्वा इति वह्न्यष्टकं जप्त्वा रामपत्नी यशस्विनी ध्यायंती मनसा तस्थौ राममुन्मीलितेक्षणा। आवसथ्यो भग
वान् हव्यवाहो महेश्वरः॥ आविरासी सुदीप्तात्मा तेजसा निर्दहन्निव॥ सृष्ट्वा मायामयीं सीतां स रावणवधेछया। सीतामा

रावणस्य वधो युद्धे सपुत्रस्य दुरात्मनः॥ विभीषणे राज्यदानं पुष्पकेण मया सह॥ ४१॥ ॥ छ॥

दाय रामेष्टां पावकोंतरधीयत॥ कृत्वा तु रावणवधं रामो लक्ष्मणसंयुतः॥ समायाभगवत्सीतां शंकाकुलितमानसा प्र
त्ययाय भूतानां सीतामायामयी पुनः विवेश पावकं दीप्तं ददाह ज्वलनोपि तां॥ दग्ध्वा मायामयीं सीतां भगवानुग्रदीधि
तिः॥ रामायादर्शयत्सीतां पावकोसौ सुरप्रियः॥ एतत्पतिव्रतानां वै माहात्म्यं कथितं मया॥ स्त्रीणां सर्वाघशमनं प्रा
यश्चित्तं परं स्मृतमिति॥ अनेन स्त्रीणामेवंविधापदि अग्निप्रवेशो न दोषाय विपरीतं सर्वपापहरत्वं चेति सूचितं
वाल्मीकीयेपि मारीचवधार्थं गते रामे रामहतेन रामशब्दसदृशशब्दैराक्रोशे कृते लक्ष्मणस्य रामसहायार्थं गमने प्रे

रणावसरे आरण्यकांडे अपि त्वा सह रामेण पश्येयं पुनरागतः ॥ लक्ष्मणेनैवमुक्ता तु रुदंती जनकात्मजा ॥ प्रत्युवाच ततो
वाक्यं तीव्रबाष्पपरिप्लुता ॥ गोदावरीं प्रवेक्ष्यामि हीना रामेण लक्ष्मण ॥ आबंधिष्येथवा त्यक्ष्ये विसमे देहमात्मनः
विषमे भृग्वादौ स्थित्वा ततः प्रपातेनेत्यर्थः ॥ पिबामी वा विषं तीक्ष्णं प्रवेक्ष्यामि हुताशनं नत्वहं राघवादन्यं कदा
पि पुरुषं स्पृहे ॥ इति सीतोक्त्या सूचितोयमर्थः ॥ अन्यथैवं प्रतिज्ञापरावणशरीरस्पर्शे जगन्मातुः प्रतिज्ञाहानी
स्यात् ॥ तस्मात्प्रवेक्ष्यामि हुताशनमित्यनेन स्वकर्त्तव्यार्थ एवोक्त इति मंतव्यं ॥ एतत्प्रवेशादेव हनुमत्पुच्छसंबद्धा
ग्निना लंकादाहोपपत्तिः ॥ अन्यथा रावणवशीकृतेन लोकपालाग्निना कथं तन्नगरदाहः स्या ॥ एतच्छक्तिप्रवेशेन तु त
स्य स्वातंत्र्यहान्या तदुपपत्तिरित्यलं ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ रावमादीनि ब्राह्मणेभ्यो दानादीन्यादिष्टाह्याणि निर्विका

अयोध्यागमने पश्चात् राज्ये रामाभिषेचनं ॥ एवमादीनि कर्माणि मयैवाचरितान्यपि ॥ ४२ ॥ ॥ छ ॥

रे जन्मादिरहितं ॥ आरोपयंति एवं जगत्कर्तृत्वादिकमपि मन्निष्ठमेव रामे ॥ आरोपयंतीत्यर्थः ॥ ४२ ॥ निर्विकारत्वमेव राम
स्योपपादयति राम इतीति निष्कलं निष्क्रियं शांतमित्यादिश्रुतेः ॥ आनंदमूर्त्तिरानंदस्वरूपः अचलः ॥ कूटस्थो न एव
परिणामहीनः मायागुणान् ॥ मायया सृष्टपदार्थाननुगतः ॥ तदधिष्ठानत्वेन स्थितस्तथा विभाति सृष्टिरूपो भाति प
थारज्जुवच्छेदेन सर्पाकारेंतःकरणपरिणाम इति रज्जुः सर्वात्मना भाति ॥ एतदेव विवर्त्तोपादानत्वमित्याहुः सच

सर्पाकारोंतःकरणपरिणामः सत्वासत्वाभ्यामनिर्वचनीय इत्युच्यते ॥ एवं प्रपंचोप्यनिर्वचनीय इति दिक् ॥४३॥ उपस्थितं आत्मनोऽद्वितीयत्वे वेश्वरादिव्यवस्था कथमिति जिज्ञासयोपसन्नं ॥ आत्मा ईश्वरः अनात्मा चिदाभासो जीवः ॥ परात्मा शुद्धचैतन्यं ॥४४॥ तेषां तत्वमेव सदृष्टांतमाहाकाशस्येति एकस्याकाशस्य त्रिविधे भेदः ॥ महाकाशो जलाशयावच्छिन्नाकाशः प्रतिबिंबाकाशश्चेति भेदात् तदेवाह महानिति महाकाश इत्यर्थः ॥ स एव महाकाशो जलाशये तदवच्छिन्नं भवति तत्रै

आरोपयंति रामेस्मिन् निर्विकारेऽखिलात्मनि ॥ रामो न गच्छति न तिष्ठति नानुशोचत्याकांक्षते त्यजति नो न करोति किंचित् ॥ आनंदमूर्त्तिरचलः परिणामहीनो मायागुणाननुगतो हि तथा विभाति ॥४३॥ महादेव उवाच ॥ ततो रामः स्वयं प्राह हनूमंतमुपस्थितं ॥ शृणु तत्वं प्रवक्ष्यामि ह्यात्मानात्मपरात्मनां ॥४४॥ आकाशस्य यथा भेदस्त्रिविधो दृश्यते महान् ॥ जलाशये महाकाशस्तदवच्छिन्न एव हि प्रतिबिंबाख्यमपरं दृश्यते त्रिविधं नभः ॥४५॥ बुद्ध्यवच्छिन्नचैतन्यमेकं पूर्णमथापरं ॥ आभासस्त्वपरं बिंबभूतमेवं त्रिधा चितिः ॥४६॥

॥व जलाशयेऽपरं प्रतिबिंबाख्यं दृश्यते एवं नभस्त्रिविधमित्यर्थः ॥४५॥ एवं दृष्टांतमुपपाद्य दार्ष्टांतिकमाह ॥ बुद्धीति सर्वबुद्धिसाक्षितया बुद्ध्युपहितं चैतन्यं पूर्णं उपाधिमंडलस्य विभुत्वाद्धि ॥ सकलबुद्धिसमष्टिरेव मायेति ॥ तदवच्छिन्नं चैतन्यमीश्वर इत्यर्थः ॥ अथापरं आभासस्तु बुद्धिप्रतिबिंबभूतो जीव इत्यर्थः ॥ अपरं बिंबभूतं एवं चितिस्त्रिधेत्यर्थः ॥ आभासस्त्वपरं बिंबभूतमिति पाठे बुद्ध्यवच्छिन्नं चैतन्यमेकमित्यंतेनेश्वरः ॥ पूर्णमथापर

मित्यनेनप्रबुद्धं आभासस्त्व परश्चिति जीवः॥ जीवत्वमेव स्फुटयति विम्बभूतमिति विम्बशब्देन जाग्रदवस्थाभिमानी विश्वस्ति
देहेंद्रियादिविशिष्टस्यसंपत्तेः एतत्त्रितिविंबाकाशस्यानीयमितित्रिधावितिरित्यर्थ इत्याहुः तत्राद्यौ मिथ्याभूतौ उपाध्योर्मि
थ्यात्वात्॥१८॥ नन्वेवं शुद्धचैतन्ये साक्षीति व्यवहारानुपपत्तिः साक्षाद्द्रष्टा हि साक्षी न च शुद्धचैतन्ये द्रष्टृत्वमित्यत आ
ह साभासेति आभासेन चैतन्यप्रतिबिंबेन सहिताया बुद्धेरंतःकरणस्येत्यर्थः॥ तद्गतं कर्तृत्वं दर्शनकर्तृत्वमबुधैः सा
क्षिणि आरोप्यते तेनायं साक्षिपदवाच्य इत्यर्थः॥ अयमाशयः॥ जानातीत्यादावंतःकरणवृत्तिविशेषरूपा क्रिया धा
तुवाच्या आभासविशिष्टश्च तिङर्थः। आश्रयः परस्पराध्यासेनाभासबुध्योर्विविकाग्रहात् तदुक्तमाचार्यैः आ

साभासबुद्धेः कर्तृत्वमविछिन्नेऽविकारिणि॥ साक्षिण्यारोप्यते भ्रांत्या जीवत्वं च तथाऽबुधैः॥४१॥

त्माभासस्तु तिङ्वाच्यो धात्वर्थश्च धियः क्रिया उभयं चाविवेकेन जानातीत्युच्यते मृषा बुद्धेः कर्तृत्वमध्यस्य जा
नावेतीति ज्ञ उच्यते तथा चैतन्यमध्यस्य ज्ञत्वं बुद्धेश्च्यत इति आत्माभास इति बहुव्रीहिः धियोंतः। करणस्य तदेवा
ह उभयं चेति आभासबुद्धिस्थक्रियाणां मिथ्यात्वात्॥ अयं व्यवहारोपि मिथ्यैवेत्यर्थः॥ एवं च साभासबुद्धिगतद्र
ष्टत्वस्याविच्छिन्नेऽपरिच्छिन्नेऽविकारिणी साक्षिणि बुद्धितादात्म्यायन्नाभासतादात्म्याध्यासेनारोपः तथा जीवो
नित्यः सत्य इत्यादिः व्यवहारात्॥ जीवत्वमपि तद्वदारोप्यत इत्यर्थः॥४१॥ आभासमात्रायतु न तथा व्यवहारसंभव
इत्याह आभासस्त्विति तस्य मृषात्वादविद्याकार्यत्वाच्च तथा व्यवहारतमाहाय नोपपत्तिरित्यर्थः॥ न दर्पणे मुख

मस्ति मिथ्यैवात्र दर्पणे मुखमभादित्येवं सर्वसिद्धवाधानुभावात् ॥ अतएवासावविद्याकार्यं ग्रीवास्थमुखे ॥ आदर्शस्थत्वंवा ध्यासिकं न तु वास्तवमिति बोध्यं आभासासत्यत्वं चाकारे प्रपंचितं विस्तरभयान्नेहोच्यते ननूक्तं त्रैविध्यं किं चितेर्वास्तवं नेत्याह ॥ अविच्छेदो भेदरहितं ॥ नन्वेवं त्रिधा वितितिरित्यसंगतं तत्राह विच्छेद इति भेद इत्यर्थः। विकल्पितः उपाध्यध्यासकृत इत्यर्थः एवं जीवानां परस्परभेदोप्यध्यासकृत एवेति बोध्यं ॥४८॥ कल्पितभेदसत्वे प्रमाणमाह ॥ अविच्छिन्नस्येति अवच्छेदो भेदरहितः ॥ अध्यासिकभेदवतः साभासस्याहमस्तत्वमस्यादिवाक्यैः पूर्णेनेश्वरेण ऐकत्वं प्रतिपाद्यते तत्त्वमसि

आभासस्तु मृषा बुद्धिरविद्याकार्यमुच्यते ॥ अविच्छिन्नं तु तद्ब्रह्म विच्छेदस्तु विकल्पितः ॥४८॥ अवच्छिन्नस्य पूर्णेन एकत्वं प्रतिपाद्यते ॥ तत्त्वमस्यादिवाक्यैश्च साभासस्याहमस्तथा ॥४९॥ ॥ छ ॥ ॥ छ ॥

कल्पितभेदे सति उपपद्यते इति शेषः सर्वथा भेदाभावे तदानर्थक्यं वास्तवेपि भेदे तदानर्थक्यं वास्तवस्य वचनशतेनाप्यनिवृत्तेरिति भावः ॥ अत्रावच्छिन्नस्य साभासस्याहमित्यनेन त्वंपदार्थो दर्शितः पूर्णेनेत्यनेन तत्पदार्थो दर्शितः ॥४९ एतदेव ध्वनयन्नूतदुपदेशफलमाह एक्येति आत्मनोः जीवेश्वरयोः ऐक्यज्ञानं अहं ब्रह्मेति ज्ञानं पदेति कर्मानुष्ठानात्सपक्षे समुत्पन्नं कषायेकर्मभिः पक्वे ततो ज्ञानं प्रवर्त्तत इति स्मृतेः अयंभावः [illegible] जीवेश्वरयोरुपाधिभिन्नयोरैक्यं श्रुत्योच्यमानं वाधितं सत् तत्वंपदयोरुपाधिरहिते लक्षणमाविंवभूत शुद्धब्रह्मैक्यपरतया पर्यवस्यती

रा०अ०बा०
१८

रण त्वदाख्यीय भक्तिव्यतिरेके कार्यव्यतिरे
कमाह मद्भक्तीति शास्त्रगर्तेषु शास्त्रबो
धितक्रियाकलापरूपगर्तेषु॥५१॥

ति बोध्यं एतच्चाकारे विस्तरेण प्रपंचितं ब्रह्मैक्यज्ञानफलमाह। तदेति तादृशज्ञाने सति निर्धर्मकत्वेन चिन्मात्रतया त
त्स्वरूपज्ञानात्तत्स्वरूपाज्ञानरूपाऽविद्या स्वकार्यैः प्रपंचैः सह नश्यत्येव संशयः॥ एतेन भ्रष्टबीजवत्कार्याजननसाम
र्थ्यमेव तस्याज्ञाने क्रियत इति पक्षोपास्तः तदुक्तमाचार्यैः सोपमित्यादिवाक्येषु विरोधात्तदिदं तयोः॥ त्यागेन भागयो
रेकआश्रयो लक्ष्यते इति यथा मायाविद्ये विहायैवमुपाधी परजीवयोः॥ अखंडं सच्चिदानंदं परंब्रह्मैव लक्ष्यते यथा

ऐक्यज्ञानं यदोत्पन्नं महावाक्येन चात्मनोः॥ तदाविद्या स्वकार्यैश्च नश्यत्येव न संशयः॥५०॥ एतद्धि
ज्ञाय मद्भक्तो मद्भावायोपपद्यते॥ मद्भक्तिविमुखानां हि शास्त्रगर्तेषु मुह्यतां॥ न ज्ञानं न च मोक्षः
स्यात्तेषां जन्मशतैरपि॥५१॥

सोयं देवदत्त इत्यादौ पूर्वानुभूतत्वरूपतत्तया इदानीमनुभूयमानत्वस्त्वयेदंतायाश्च त्यागेन देवदत्तस्वरूपमात्रे लक्ष्य
ते यथा सोयं देवदत्त इत्यादौ पूर्वानुभूतत्वरूपतत्तायाइदानीमनुभूयमानत्वत्वयेदंतायाश्च त्यागेन देवदत्तस्वरूपमात्रं
लक्ष्यते मायाबुद्धिसमष्टिरविद्याव्यष्टिरूपेति बोध्यं॥ अपरोक्षज्ञानं मननादिसंस्कृतमनः आत्मदर्शने करणं यथा बु
ध्येति स्मृतेः अग्र्यया मननादिसंस्कृतया शास्त्राचार्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करणमिति गी
ताभाष्योक्तेश्चेति दिक् उक्तंच॥ नारदीये तत्त्वमस्यादिवाक्योत्थज्ञानं मोक्षस्य साधनमिति श्रुतिरपि तमेव विदित्वाति

मृत्युमेति नान्यः पंथा विद्यतेऽयनायेति॥५०॥ इह
शास्त्रज्ञानस्य मुख्यं साधनमाह॥ एतदिति मद्भक्त इति
तैस्तु गर्भे विशेषणं मद्भावो मत्सायुज्यं भक्तेः का

राम
१८

ममात्मनः मद्रूपस्य चेतनस्य ।५२॥५३। सर्ववेदांतसंग्रहं सर्ववेदांतप्रतिपाद्यार्थसारसंग्रहरूपं ।५४॥५५॥ अतिभ्रष्टत्वोप
पादकमतिपापीत्यादि सर्वदेवैः रम्यं पदं ब्रह्मलोकं स लभ इत्यन्वयः ॥५६॥ इति श्रीमत्सकलराज० अध्यात्मरामाय
ण० बालकांडे प्रथमः सर्गः ॥१ अथ पार्वतीरिवोक्तमभिनंदन्त्यास्मीति ॥ अहिसंदेहग्रंथिः यदि रामः । परं ब्रह्म तर्हि कथं

इदं रहस्यं हृदयं ममात्मनो मयैव साक्षात्कथितं तवानघ ॥ मद्भक्तिहीनाय शठाय न त्वया दातव्यमैं
द्राद्पि राज्यतोधिकं ॥ श्रीमहादेव उवाच ॥ एतत्तेभिहितं देवि श्रीरामहृदयं मया ॥ अतिगुह्यतमं
हृद्यं पवित्रं पापशोधनं ॥५३॥ साक्षाद्रामेण कथितं सर्ववेदांतसंग्रहं ॥ यः पठेत्सततं भक्त्या स
मुक्तो नात्र संशयः ॥५४॥ ब्रह्महत्यादिपापानि बहुजन्मार्जितान्यपि ॥ नश्यंत्येव न संदेहो रामस्य व
चनं यथा ॥५५॥ योतिभ्रष्टोतिपापी परधनपरदारेषु नित्योद्यतो वा स्तेयी ब्रह्मघ्न मातापितृवधनि
रतो योगिवृंदापकारी यः संपूज्याभिरामं पठति च हृदयं रामचंद्रस्य भक्त्या ॥ योगींद्रैरप्यलभ्यं
पदमिह लभते सर्वदेवैः सपूज्यं ॥५६॥ इति श्रीमदध्यात्म श्रीरामहृदयं नाम प्रथमः सर्गः ॥१॥ पार्वत्युवा
च ॥ धन्यास्म्यनुगृहीतास्मि कृतार्थास्मि जगत्प्रभो ॥ विच्छिन्नो मेतिसंदेहग्रंथिर्भवदनुग्रहात् ॥१॥

तस्य शोकादि यदि शोकादिमत्वाज्जीवः कथं तदोपास्यत्वमित्याकारो महान्संदेहरूपो ग्रंथिः विच्छिन्नः निवृत्तः ॥१॥ भवः सं
सारस्तमपहंति नाशयतीति तादृशं रामतत्वामृतरसायनं रामतत्वरूपममृतजनकं मोक्षजनकं रसायनं पंपिबंस्या मेम

१ त्मरामायणे उमामहेश्वरसंवादे बालकांडे १

रा०अ०व्या०
१७

नोन तृप्यति ॥ २ ॥ पुनर्विस्तरेण रामकथां पृच्छति श्रीरामस्येति स्फुटं पृच्छामीति क्रियाविशेषणं ॥ ३ ॥ अथ महादेवस्तां कथां
विवक्षुस्तत्र श्रोतृप्रवृत्तये तत्प्रशंसामाह धन्यासीति ॥ आत्मस्वित्यध्यात्मं सर्वात्मसु अंतर्यामितया स्थितस्य रामस्य च
रितं तद्वर्णनरूपं काव्यं ॥ ४ ॥ तापत्रयं आध्यात्मिकाधिभौतिकाधिदैविकाख्यदुःखत्रयं तत्राद्यं रोगादिजं कामक्रोधादिजं च

त्वन्मुखाब्जच्युतं रामतत्त्वामृतरसायनं ॥ पिबंत्या मे मनो देव न तृप्यति भवापहं ॥ ५ ॥ श्रीरामस्य कथा
त्वत्तः श्रुता संक्षेपतो मया ॥ इदानीं श्रोतुमिच्छामि विस्तरेण स्फुटाक्षरं ॥ ६ ॥ महादेव उवाच ॥ शृणु
देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् अध्यात्मरामचरितं रामेणोक्तं पुरा मम ॥ ७ ॥ तदद्य कथयि
ष्यामि शृणु तापत्रयापहं ॥ यच्छ्रुत्वा मुच्यते जंतुरज्ञानोत्थमहाभयात् ॥ प्राप्नोति परमामृद्धिं दीर्घायुः
पुत्रसंततिं ॥ ८ ॥ भूमिर्भारेण मग्ना दशवदनमुखाशेषरक्षोगणानां ॥ धृत्वा गोरूपमादौ दिविजमु
निजनैः साकमब्जासनस्य ॥ गत्वा लोकं रुदंती व्यसनमुपगतं ब्रह्मणे प्राह सर्वं ब्रह्मा ध्यात्वा मुहूर्तं स ती ६
कलमपि हृदावेदशेषात्मकत्वात् ॥ ९ ॥ तस्मात्क्षीरसमुद्रतीरमगमद्ब्रह्माथ देवैर्वृतो देव्या चाखिललो म ०
कहृत्स्थमजरं सर्वज्ञमीशं हरिं ॥ अस्तौषीच्छ्रुतिसिद्धनिर्मलपदैः स्तोत्रैः पुराणोद्भवैर्भक्त्या गद्गदया गि
रातिविमलैरानंदबाष्पैर्वृतः ॥ १० ॥ राम०
१७

द्वितीयं चोरादिनिमित्तं तृतीयं ग्रहाद्यावेशनिमित्तं ॥ ५ ॥ कथामस्तोति भूमिरिति रक्षोगणानां भारेण मग्ना स्वाधारजले म
ग्ना गोरूपं धृत्वा देवादिभिः सह अब्जासनस्य ब्रह्मणो लोके गत्वा ब्रह्मणे उपगतं ॥ स्वयं प्राप्तं सर्वं व्यसनं प्राह स मुहूर्तं

ध्यात्वा सकलदुःखकारणं तन्निवृत्तिकारणं च हृदा वेत् ॥ अज्ञानात् तत्र हेतुः अशेषात्मकत्वात् । सर्वस्वस्वरूपसमष्टिरूपत्वात् इत्यर्थः ॥ ९ ॥ तस्मादिति अनंतरमिति शेषः ॥ तदनंतरं ध्यानानंतरमित्यर्थः देव्या च भूम्या च सहित इति शेषः अखिललोकहृतं य सर्वांतर्यामीत्यर्थः ॥ स वा एष आत्मा हृदीति श्रुतेः ॥ अजर एष माहानात्माऽजर इति श्रुतेः सर्वज्ञेयः । सर्वविदिति श्रुतेः ईशं एष सर्वेश्वर इति श्रुतेः ॥ हरिं हरणम्पघं हि स्मर्तॄणां हविर्भागं क्रतौ तथा वर्णाश्च मेह

ततः स्फुरत्सहस्रांशुसहस्रसदृशप्रभः ॥ आविरासीद्धरिः प्राच्यां दिशं व्यपनयंस्तमः ॥ ८ ॥ कथंचिद्दृष्टवान्ब्रह्मा दुर्दर्शमकृतात्मनां इंद्रनीलप्रतीकाशं स्मितास्यं पद्मलोचनं ॥ ९ ॥ किरीटहारकेयूरकुंडलैः कटकादिभिः ॥ विभ्राजमानं श्रीवत्सकौस्तुभप्रभयान्वितं ॥ १० ॥ स्तुवद्भिः सनकाद्यैश्च पार्षदैः परिवेष्टितं ॥ शंखचक्रगदापद्मवनमालाविराजितं ॥ ११ ॥ स्वर्णयज्ञोपवीतेन स्वर्णवर्णांबरेण च ॥ श्रिया भूम्या च सहितं गरुडोपरि संस्थितं ॥ हर्षगद्गदया वाचा स्तोतुं समुपचक्रमे

॥ १३ ॥

रिष्यस्मात्तस्माद्धरिरहं स्मृत इति स्मृतेः ॥ श्रुतिसिद्धनिर्मलहरिविष्णुप्रभृतिपदयुक्तैः पुराणोद्भवैः स्तोत्रैरित्यर्थः भक्तिमूलिकैर्वच गद्गदवाणी भक्तित्वाद्देवानां दुवास्याणां विमलत्वं सहस्रांशुसहस्रसूर्यसहस्रं ॥ ८ ॥ अकृतात्मनां ज्ञानहीनानां तेजोराशित्वात्कथंचिद्दर्शनं ॥ ९ ॥ १० ॥ पार्षद्गणाः ॥ ११ ॥ स्वर्णवर्णांवरं पीतांवरं ॥ १२ ॥ १३ ॥ ॥

प्राणः क्रियाशक्तिप्रधानां प्राणाः तेन कर्मेंद्रियसंग्रहः बुद्धींद्रियाणि श्रोत्रादीनि आत्मा मनस्तैः करणभूतैर्नतोस्मि
कर्मपाशान्मुमुक्षुभिर्यत्पदं हृदि चिंत्यते इत्यन्वयः ॥१४॥ गुणमय्या सत्वरजस्तमोगुणयुक्तया मायया सचिवया जग
त्सृजसि तेन स्रष्टृत्वादिना ते लेपोऽहं स्रष्टेत्याद्यभिमानो न तत्र हेतुगर्भं विशेषणं आनंदानुभवात्मनः ॥ आनंदाभिन्नानु

ब्रह्मोवाच ॥ नतोस्मि ते पदं देव प्राणबुद्धींद्रियात्मभिः ॥ यच्चिंत्यते कर्मपाशात् हृदि नित्यं मुमुक्षुभिः
१४ मायया गुणमय्या त्वं सृजस्यवसि लुंपसि ॥ जगत्तेन न ते लेप आनंदानुभवात्मनः ॥१५॥ तथा शु
द्धिर्न दुष्टानां दानाध्ययनकर्मभिः शुद्धात्मनां ते यशसि सदा भक्तिमतां यथा ॥१६॥ अतस्तवांघ्रिर्मे
दृष्टश्चित्तदोषापनुत्तये ॥ सद्योंतर्हृदये नित्यं मुनिभिः सात्वतैर्वृतः ॥१७॥ ब्रह्माद्यैः स्वार्थसिद्ध्यर्थम
स्माभिः पूर्वसेवितः ॥ अपरोक्षानुभूत्यर्थं ज्ञानिभिर्हृदि भावितः ॥१८॥ तवांघ्रिपूजानिर्माल्यतुलसीमा
लया विभो ॥ स्पर्द्धते वक्षसि पदं लब्ध्वापि श्रीः सपत्निवत् ॥१९॥ अतस्त्वसादरभक्तेषु तव भक्तिः श्रि
योधिका ॥ भक्तिमेवाभिवांछंति त्वद्भक्ताः सारवेदिनः ॥२०॥

ऽनुभवरूप आत्मा यस्य तस्य एवं च स्वस्वरूपापरो
क्षेण सर्वत्र मिथ्यादृष्टं तदभिमानरहित इति भावः ॥१५॥ दुष्टानां मलिनांतःकरणानां शुद्धात्मनां शुद्धांतःकरणानां ते
यशसि तव गुणकीर्त्तने ॥१६॥ सात्वतैर्भक्तैः वृतोंतर्हृदये सद्यो दृष्टस्तवांघ्रिर्मे चित्तदोषापनुत्तये स्त्विति शेषः ॥१७

स्वार्थसिध्यर्थं स्वकर्त्तव्यस्य रक्षणादिसिध्यर्थं स्वकर्त्तव्यस्य रक्षणादिसिध्यर्थं ज्ञानिभिः ज्ञानेबुभिः ॥१८॥ सपत्निवत् आर्षो ह्रस्वः सपत्निच्च दिसर्थः ॥१९॥ यतः स्वचरणभक्तेषु तव लक्ष्मीतोप्यधिका भक्तिः प्रीतिरतः । सा खेदिनस्त्वमद्भक्ता स्त्वच्चरणयोर्भक्तिमेव वांछति ॥२०॥ अतएतियतस्तेभक्तिरेव संसाररोगभेषजं अत इत्यन्वयः ॥२१॥ ब्रह्माणं हरिः किंकरोमीति बभाषेऽयतहरिं वेधाः प्रत्युवाचेति संबंधः ॥२२॥ रावण इति रावयामासल्लोकान्यतस्माद्रावण उच्यते इति भारतोक्तेः मयाब्रह्मणादत्तेन वरेण दर्पितोहं कृतः ॥ वरश्च मनुष्यातिरिक्तावध्यत्वरूपः ॥२३॥ तदेवाह मानुषेणेति ॥२४॥ कश्यपस्य

अतस्त्वत्पादकमले भक्तिरेव सदास्तु मे ॥ संसारामयतप्तानां भेषजं भक्तिरेव ते ॥२१॥ इति ब्रुवंतं ब्रह्माणं बभाषे भगवान् हरिः ॥ किंकरोमीति तं वेधाः प्रत्युवाचातिहर्षितः ॥२२॥ भगवन् रावणो नाम पौलस्त्यतनयो महान् ॥ राक्षसानामधिपतिर्मद्दत्तवरदर्पितः ॥२३॥ त्रिलोकीं लोकपालांश्च बाधते विश्वबाधकः ॥ मानुषेण मृतिस्तस्य मया कल्याण कल्पिता ॥ अतस्त्वं मानुषो भूत्वा जहि देवरिपुं प्रभो ॥२४॥

तपसा तोषितेन मे मया तस्मै वरो दत्तः ॥ यत्त्वं याचिष्यसि तत्तुभ्यं दास्यामीति कृतवरदानप्रतिज्ञ इत्यर्थः । ततस्तेनाहं पुत्रभावाया चितो मयाच तत्तथेत्यंगीकृतमित्यर्थः ॥२५॥ अहं तस्य पुत्रनाम्ने त्वपुत्रता प्राप्स्यामीति संकल्प्य कौशल्यायामितयोः सुमित्राकैकेय्योरहमेवात्मानं चतुर्धा चतुः प्रकार एव यवसंस्थानैः ॥ रामलक्ष्मणभरतशत्रुघ्नेति च चतुः ॥ प्रकारतामभिश्च सृजामि वर्त्तमानसामीप्ये लट् ॥२६॥ योगमायेति योगो मत्संकल्पस्तदनुवर्त्तिनी मायेत्यर्थः ॥ नाहं प्रकाशः सर्वस्य

योगमायासमावृत्त इति गीतोक्तेः ॥ तयासार्द्धं तां सहकारिणीं प्राप्य ॥२७॥२८॥२९॥ अंशांसंभवान् स्वस्वांशसंभवान् वानराणि त्यर्थः ॥३१॥३१॥ इत स्ततः पर्वतवनेषु ॥३२॥ इति श्रीमत्सकलराजविपदुधरणसमर्थेत्स्यादिविरुदावलीविराजमानस्फटि

॥श्रीभगवानुवाच॥ कश्यपस्य वरो दत्तस्तपसा तोषितेन मे ॥ याचितः पुत्रभावाय तथेत्यंगीकृतं मया ॥२५॥ स इदानीं दशरथो भूत्वा तिष्ठति भूतले ॥ तस्याहं पुत्रतामेत्य कौसल्यायां शुभे दिने ॥२६॥ चतुर्द्धात्मानमेवाहं सृजामीतरयोः पृथक् ॥ योगमायापि सीतेति जनकस्य गृहे तदा ॥ उत्पत्स्यते तया सार्द्धं सर्वं संपादयाम्यहं ॥२८॥ इत्युक्त्वांतर्दधे विष्णुर्ब्रह्मा देवानथाब्रवीत् ॥ विष्णुर्मानुषरूपेण भविष्यति रघोः कुले ॥२९॥ यूयं सृजध्वं सर्वेपि वानरेष्वंशसंभवान् ॥ विष्णोः सहायं कुरुत यावत्स्थास्यति भूतले ॥३०॥ [illegible] इति देवान्समादिश्य समाश्वास्य च मेदिनीं ॥ ययौ ब्रह्मा स्वभवनं विज्वरः सुखमास्थितः ॥३१॥ देवाश्च सर्वे हरिरूपधारिणः स्थिताः सहायार्थमितस्ततो हरेः ॥ महाबलाः पर्वतवृक्षयोधिनः प्रतीक्षमाणा भगवंतमीश्वरं ॥३२॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे बा० द्वितीयस्सर्गः ॥२॥ ॥महादेव उवाच॥ अथ राजा दशरथः श्रीमान्सत्यपरायणः ॥ अयोध्याधिपतिवीरः सर्वलोकेषु विश्रुतः ॥१॥ सोनपत्यत्वदुःखेन पीडितो गुरुमेकदा वसिष्ठं स्वकुलाचार्यमाहूयेद

श्लोकाः ८
पं ५

मतिवर्मणः पुत्रस्य श्रीरामवर्मणः ॥ कृतौ अध्यात्मरामायणसेतौ बालकांडे द्वितीयः सर्गः ॥२॥ अथ रामादिजन्माहाथे

सर्वदुःखायेति मनुष्यलोकः पुत्रेणैकजय्यो नान्येन कर्मणेति श्रुतेः ॥३॥४॥ शांता भर्त्तारं शांता लोमपाददशरथस्यांगप
तेरेतद्दशरथमित्रस्य कन्यानेन राज्ञा ततो लब्ध्वा स्वदुहितृत्वेन कल्पितेत्याख्यायिका पुत्रकामस्य वर्त्तव्येष्टिः पुत्रकामेष्टी

स्वामिन् पुत्राः कथं मे स्युः सर्वलक्षणलक्षिताः ॥ पुत्रहीनस्य मे राज्यं सर्वदुःखाय कल्पते ॥३॥ ततोब्रवी
द्वसिष्ठस्त्वं भविष्यंति सुतास्तव ॥ चत्वारः सत्वसंपन्ना लोकपाला इवापरणः ॥४॥ शांताभर्त्तारमानीय
ऋष्यशृंगं तपोधनं अस्माभिः सहितः पुत्रकामेष्टिं शीघ्रमाचर ॥५॥ तथेति मुनिमानीय मंत्रिभिः
सहितः शुचिः यज्ञकर्म समारेभे मुनिभिर्वीतिकल्मषैः ॥६॥ अरूयाहूयमानेग्नौ तप्तजांबूनदप्रभः
पायसं स्वर्णपात्रस्थं गृहीत्वोवाच हव्यवाट् ॥७॥ गृहाण पायसं दिव्यं पुत्रीयं देवनिर्मितं ॥ लभस्व
से परमात्मानं पुत्रत्वेन न संशयः ॥८॥ इत्युक्त्वा पायसं दत्वा राज्ञे सोंतर्दधेऽनलः ॥ ववंदे मुनिशार्दूलौ
राजा लब्धमनोरथः ॥९॥ वसिष्ठऋष्यशृंगाभ्यामनुज्ञातो ददौ हविः ॥ कौसल्यायै स कैकेय्यै अर्धम
र्द्धं प्रयत्नतः ॥१०॥ ततः सुमित्रा संप्राप्ता जगृध्रुः पौत्रिकं चरुं ॥ कौसल्या तु स्वभागार्द्धं ददौ तस्यै मुदान्वि

५॥ मुनिं ऋष्यशृंगं मुनिभिर्वसिष्ठाद्यैः ॥६॥ तप्तजांबूनदं हृत्तमलापहरणं स्वर्णं तद्वत्कांतिर्हव्यवाऽग्निः अयमे
व प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृपेति वाल्मीकीये प्राजापत्यशब्देनोक्तः ॥७॥ पुत्रीयं पुत्राय हितं ॥८॥ मुनिशा

रा॰बा॰अ॰
२०

दूलौबसिष्ठऋष्यशृंगौ॥९॥१०॥जगृध्नुः भक्ष्यांतदिच्छावती गृध्नुःअभिकांक्षायामित्यनोयङ्लुगंतादागमशास्त्रस्यानित्यत्वेन
हगभावे त्रसिगृधिधृषिक्षिपेः क्नुरिति क्नोक्नयं पौत्रिकं चरुमिति षष्ठभावः आर्षपुत्रः प्रयोजनमस्य तादृशं चरुमित्य
र्थः स्वभागार्धं स्व एव आत्मीयवाची स्वीयस्य भागः स्वभागस्तदर्धं स्वदत्तस्य चतुर्थांशमित्यर्थः॥ एवमग्रेपि वाल्मीकी
येपि कौसल्यायै नरपतिः पायसार्धं ददौ मुदा॥ अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः॥ कैकेय्यै चावशिष्टार्धं ददौ

कैकेयी च स्वभागार्धं ददौ प्रीतिसमन्विता॥ उपयुज्य चरुं सर्वाः स्त्रियो गर्भसमन्विताः॥१२॥ देवताइ
व रेजुस्ताः स्वभासा राजमंदिरे॥ दशमे मासि कौसल्या सुषुवे पुत्रमद्भुतं॥१३॥ मधुमासे सिते
पक्षे नवम्यां कर्कटे शुभे॥ पुनर्वस्वृक्षसहिते उच्चस्थे ग्रहपंचके॥१४॥ मेषं पूषणि संप्राप्ते पुष्पवृ
ष्टिसमाकुले॥ आविरासीज्जगन्नाथः परमात्मा सनातनः॥१५॥ ॥ श्रीगणेशायनमः ॥॥॥

पुत्रार्थकारणात्॥ प्रददौ चावशिष्टार्धं पायसस्यामृतोपमं ननुचित्य सुमित्रायै पुनरेव महामतिरिति श्लोकयोः
कौशल्यायै दत्तार्धं चतुर्थांशरूपं सुमित्रायै ददौ कौशल्यायादापितवानित्यर्थः कार्यः॥ अर्धादित्यत्र कस्यार्धादि
त्याकांक्षायामुपस्थिता कौशल्यादत्तपायसार्धान्वयस्यैवोचितत्वात्॥ अंतर्भावितणिजर्थत्वे मानं चैतदेकवा
क्यतैव एवं कैकेय्यै कौशल्यादवशिष्टमर्धं ददौ॥ ततः कौशल्यादत्ता वसिष्ठस्य कैकेय्यै दत्तस्यपदर्धं

राम॰
२०

विचार्य पुनरपि सुमित्रायै द्दौ दापयामासेत्यर्थः । अत्र चार्धपदावृत्तिर्वैध्या एवं हि एतद्ग्रंथेन तस्यैव वाच्यता भवति तद्वृत्तभाग
जन्यस्य तत्सुताधीनौ तौ चिरेयेन एवमेवोचितं सेव्यसेवकभावत्वाभार्थं ततस्ततोऽन्यनोशत्वस्य लक्ष्मणशत्रुघ्नयोरौचित्या
त्वाऽन्नस्य स्वभागार्धमिति यथाश्रुतेन व्याख्यातं कालिदासोऽपि स तेजो वैष्णवं पत्न्यो विभेजे चरुसंज्ञितं ॥ द्यावापृथिव्योः प्रत्यग्र
महर्पतिरिवातपं ॥ अर्चिता तस्य कौशल्या प्रिया केकयवंशजा अतः संभाविता ताभ्यां सुमित्रामैच्छदीश्वरः ॥ ते बहुज्ञस्य
चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः ॥ चरोरर्धार्धभागाभ्यां तामुभे साहि प्रणयवत्यासीत्सपत्न्योरुभयोरपि इत्याह ॥ चरोरर्धार्धभा
गाभ्यामित्यस्य स्वस्वलब्धचरुभागादर्धार्धभागाभ्यामित्यर्थः ॥ एवं च रामभरतौ त्रित्र्यंशौ लक्ष्मणशत्रुघ्नावष्टमांशाविति
सिद्धं ॥ वाल्मीकीयव्याख्यातारौ कतकाचार्यश्रीरामाचार्यावप्येवमेवोचतुः ॥ अन्ये तु तद्व्याख्यातारः कौशल्यायै संह
र्षपायसार्धं ददौ ततः पात्रस्यादर्धादर्धं सर्वपापप्रघातुर्यांशं सुमित्रायै दत्तवान्स्वयमेव ॥ ततः पात्रेवशिष्टस्य च तुर्यांश
स्यार्धमष्टमांशं कैकेय्यै दत्तवान् ॥ ततः पुनरवशिष्टधर्ममष्टमांशरूपं पुनरपि सुमित्रायै दत्तवानिति यथाश्रुतग्राहिणो
व्याचक्षते तेषां तद्विरोधी रामलक्ष्मणयोरेव भरतशत्रुघ्नयोरेवैकवाक्यतायां बीजालाभश्चाऽवशिष्टार्धपदे क्वचित्स
ष्ठीतत्पुरुषः क्वचित्कर्मधारय इति वैषम्यं च ॥११॥ स्वभागार्धमिति प्राग्वत् ॥१२॥१३॥ मधुमासे चैत्रे सिते शुक्ले कर्कटे
लग्ने पुनर्वसुसहिते पुनर्वसुनक्षत्रसहिते इति कर्कलग्नविशेषणं ग्रहपंचकं चंद्रबुधव्यतिरिक्ते रविभौमगुरुभृ
शनिरूपे तदुच्चस्थानानि चक्रमेण मेषमकरकर्कमीनतुला ख्याति ॥१४॥ सर्वग्रहास्तोदयस्य रव्याधीनत्वात्तदुच्चे
स्थानं स्फुटयति मेषमिति तेन सर्वेषामनस्तगतत्वं सूचितं ॥ पुष्पवृष्टिसमाकुले इत्यर्थः ॥१५॥ ॥ ॥ छ ॥ ॥ छ ॥

तत्र कौसल्यानुग्रहाय प्रथमं येन रूपेण प्रादुर्भूतस्तद्रूपमाह नीलोत्पलेति ॥१६॥१७॥ अनुग्रहाख्येति भक्तानुग्रहाख्यो यो हृदयस्य
इंदुस्तस्य सूचिकास्मितरूपां चंद्रिका यस्य सः स्मितं चेषद्विकसितैर्गल्लैः । कटाक्षैः सौष्ठवान्वितैः अलक्षितद्विजं धीरमु
त्तमानां स्मितं ॥ भवेदिति लक्षितं ॥१८॥ परमात्मा शुद्धबुद्धमुक्तस्वभावः अच्युतः स्वस्वरूपात्कदापि न च्युतः शाश्वतं शिव
मच्युतमिति श्रुतेः अनंतगुणः निस्सत्वादंतरहित इति वा पूर्णः ॥ देशकालापरिच्छेद्यः पुरुषेभ्य उत्तमः सर्वाधिष्ठानत्वात्

नीलोत्पलदलश्यामः पीतवासाश्चतुर्भुजः । जलजारुणनेत्रांतः स्फुरत्कुंडलमंडितः ॥१६॥ सहस्रार्कप्र
तीकाशः किरीटी कुंचितालकः ॥ [illegible] शंखचक्रगदापद्मवनमालाविराजितः ॥१७॥ अनुग्र
हाख्यहृत्स्थेंदुसूचितस्मितचंद्रिकः करुणारससंपूर्णविपुलोत्पललोचनः ॥ श्रीवत्सहारकेयूरनूपु
रादिविभूषणः ॥१८॥ दृष्ट्वा तं परमात्मानं कौसल्या विस्मयाकुला ॥ हर्षाश्रुपूर्णनयना नत्वा प्रांजलिरब्रवीत्
॥१९॥ कौसल्या उवाच देवदेव नमस्तेस्तु शंखचक्रगदाधर ॥ परमात्माच्युतोनंतः पूर्णस्त्वं पुरुषोत्तमः ॥२०॥
वदंत्यगोचरं वाचां बुद्ध्यादीनामतींद्रियं ॥ त्वां वेदवादिनः सत्तामात्रं ज्ञानैकविग्रहं ॥२१॥

॥२०॥ वाचां बुद्ध्यादीना
मिंद्रियाणां चागोचरं वदंति ॥ यतो वाचो निवर्तंते ऽप्राप्य मनसा सहेत्यादिश्रुतयः ॥ वागादिसर्वेंद्रियत्वाच्च न तासां विषयः
न हि घटादिप्रकाशको दीपो घटादिविषयो भवति अत एव त्वामतींद्रियं वेदवादिनो वेदज्ञा वदंति ते त्वां सत्तामात्रं सर्वत्र स
संबंधात् सदिति व्यवहारोपपादकं सर्वाः प्रजाः सदायतनाः इति श्रुतेः । ज्ञानैकविग्रहं सत्यं ज्ञानमिति श्रुतेः वदंति ॥२१॥

त्वमिति त्वमेव मायया सत्वादिगुणसंयुक्तः॥ तत्तद्गुणप्रयुक्त ब्रह्मविष्णुरुद्रात्मकः सन् सृष्ट्यादि करोषि तत्र रजःप्रधानो ब्रह्मा
सत्वप्रधानो विष्णुः तमःप्रधानो रुद्रः विष्णोर्दैत्यादिहतृत्वमपि पालनार्थमेव दुष्टनिग्रहं विना शिष्टपालनायोगात्॥ परमार्थ
तस्तु निगुण एव त्वमित्याह तुर्य एवेति तत्तद्गुणसंयुक्तोक्तमूर्तित्रयापेक्षया चतुर्थ इत्यर्थः। यद्वा जाग्रत्स्वप्नसुषुप्तावस्थ
रूपविश्वप्राज्ञतैजसेभ्यस्तुर्य इत्यर्थः॥ न बहिःप्रज्ञं नांतःप्रज्ञं नानुभयतःप्रज्ञमिति श्रुतेः॥ इयं हि क्रमेण। जाग्रत्स्वप्नसुषुप्ता
वस्थानिषेधति॥ अत एव सदाऽमलः मायागुणास्पृष्टत्वादित्यर्थः॥ २२॥ अमलत्वं सूचितं निर्विकारत्वमेव स्फुटयति करोषीवि

त्वमेव मायया विश्वं सृजस्यवसि हंसि च॥ सत्वादिगुणसंयुक्तस्तुर्य एवामलः सदा॥ २२॥ करोषीव न कर्त्ता
त्वं गच्छसीव न गच्छसि॥ न शृणोषि शृणोषीव पश्यसीव न पश्यसि॥ २३॥ अप्राणो ह्यमनाः शुभ्र इत्यादि
श्रुतिरब्रवीत्॥ समः सर्वेषु भूतेषु तिष्ठन्नपि न लक्ष्यसे॥ २४॥

इति मायागतकर्तृत्वादिभिस्तद्वानिव भासि वस्तु
तो विकीररहीनत्वान्न कर्त्रेत्यादि अकुर्वन्सर्वकृच्छुद्धस्तिष्ठन्नस्येति धातः मायया सर्वशक्तित्वादजः स बहुधा मत इति अ
भियुक्ताः॥ २३॥ निर्विकारत्वे हेतुः श्रुतिदर्शितरित्याह॥ अप्राण इति दिव्यो ह्यमूर्त्तः पुरुषः सबाह्याभ्यंतरो ह्यजः॥ अप्रा
णो ह्यमनाः शुभ्रो ऽक्षरात्परतः पर इतिः। प्राणाद्युपाधिरहितः॥ अत एव कर्तृत्वादिरहित इति भावः॥ अक्षरमात्र
मायातत्तः परतः परः तद्गुणास्पृष्टः सर्वतः पर उत्कृष्ट इत्यर्थः सर्वभूतेषु समः॥ सन्घट इत्यादि प्रतीते सर्वत्रानुस्यू
तत्वात्॥ अतः। सर्वत्र तिष्ठन्नपि ॥ २४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अज्ञानध्वांतचित्तानां अज्ञानरूपांधकारव्याप्तैः शेषे षष्ठी तैर्न लक्ष्यसे सुमेधसां न त्वज्ञानां व्यक्त एव दृश्यसे त्वय्यया
बुध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति श्रुतेः॥ यस्य तव जठरे ब्रह्मांडाः परमाणवद्व दृश्यंते॥२५॥ स त्वं ममोदरसंभूत इति लोका
न् मम माहात्म्यं विडंबसे व्यापयसि॥ एतत्सर्वं भक्तिपारवश्यादित्याह भक्तेरिति॥२६॥ यद्यपि मायया ऽ पत्यादिभ्रम

अज्ञानध्वांतचित्तानां व्यक्त एव सुमेधसां॥ जठरे तव दृश्यंते ब्रह्मांडाः परमाणवः॥२५॥ त्वं ममोदर
संभूत इति लोकान् विडंबसे॥ भक्तेषु पारवश्यं ते दृष्टं मे रघूत्तम॥२६॥ संसारसागरे मग्ना पतिपु
त्रधनादिषु॥ भ्रमामि मायया ते घ पादमूलमुपागता॥२७॥ देव त्वद्रूपमेतन्मे सदा तिष्ठतु मानसे॥ आ
वृणोतु न मां माया तव विश्व विमोहिनी॥२८॥ उपसंहर विश्वात्मन्नदो रूपमलौकिकं॥ दर्शय स्व महा
नंदबालभावं सुकोमलं॥२९॥ ललितालिंगनालापैस्तरिष्याम्युत्कटं तमः॥ श्रीभगवानुवाच॥ यद्यदि
ष्टं तवास्त्येव तत्तद्भवतु नान्यथा॥३०॥

ग्नात तद्विषयोत्कटेच्छावनी संसारंसागरे भ्रमामि तथाप्यघ ते पादमूलमागता तरिष्यामीति मन्य इति शेषः॥२७॥ एतद्रू
पं शंखचक्रगदाधरत्वाविसिष्टं रूपं॥ आशास्यांतरमाह॥ आवृणोत्विति॥२८॥ उपसंहरे हेतुरलौकिकमिति सर्वलौ
कैर्द्रष्टुमशक्यं तेजोमयत्वादित्यर्थः॥२९॥ ननु त्वत्तारणार्थमेवं रूपं परिगृह इतिचेत्तत्राह॥ ललितेति तमः अज्ञान

मूलं संसारं॥३०॥

त्वदिष्टरूपभवने हेतुमाह॥ अहं त्विति मानुषत्वमुपागतः। मानुषत्वं प्राप्तुं कृतमतिः॥३१॥ तर्हि प्रथमएव किं तथा रूपं न कृतयत आह त्वयेति अहं पुत्रो यस्यास्तद्भावो मत्सुतत्वं अतस्तत्स्वकरीकर्त्तुं तथा कृतमित्यर्थः॥३२॥ प्राक्तनं तपसः फलभूतमेतद्रूपं त्वया दृष्टं न तु त्वदर्शनमात्रं न॥ पुरुषार्थेन आह मदिति एवंरूपस्य मम दर्शनमन्यैस्तपोहीनैर्दुर्ल

अहं तु ब्रह्मणा पूर्वं भूमेर्भारापनुत्तये॥ प्रार्थितो रावणं हंतुं मानुषत्वमुपागतः॥३१॥ त्वया दशरथेनाहं तपसाराधितः पुरा॥ मत्सुतत्वाभिकांक्षिण्या तथा कृतमनिंदिते॥३२॥ रूपमेतत्त्वया दृष्टं प्राक्तनं तपसः फलं॥ मद्दर्शनं विमोक्षाय कल्पते ह्यन्यदुर्लभं॥३३॥ संवादमावयोर्यस्तु पठेद्वा शृणुयादपि॥ स याति मम सारूप्यं मरणे मत्स्मृतिं लभेत्॥३४॥ इत्युक्त्वा मातरं रामो बालो भूत्वा रुरोद ह॥ बालत्वेपींद्रनीलाभो विशालाक्षोतिसुंदरः॥३५॥ बालारुणप्रतीकाशो लालिताखिललोकपः॥ ॥छ॥

भं विमोक्षाय कल्पते चित्तशुद्धिद्वारा तत्त्वमस्यादिवाक्यजज्ञानसंपादकत्वेनेति भावः॥३३॥ भक्तानुग्रहार्थं तत्र ध्येयं मापि किं भगवतो रूपमाह॥ बालत्वेपीति॥३५॥ लालिताखिललोकपः॥ स्वावतरणे न लालितास्तोषिता अखिललोक॥ ॥

पालइवादयो येनसः पुत्रोद्भवः पुत्रोत्पत्तिस्तद्रूपमुत्सवं ॥३६॥ राजीवं कमलं गुरुणेतिकरणेन ततीया जातकर्माणि वेंहुयच
नेननामकरणपर्यंतकर्त्तव्यषष्ठीपूजादिसंग्रहः ॥३७॥३८॥ सुरभीर्गाः ॥३९॥ अथनामकरणे नाम्नामन्वर्थत्वं दर्शयतियस्मि
न्निति विद्यया तत्वज्ञानेन अज्ञानविद्रवे अज्ञाननाशे तन्निमित्तं यस्मिन् योगिनो रमंते इत्येकः योगांतरमाह ॥ रमणं तु

अथ राजा दशरथः श्रुत्वा पुत्रोद्भवोत्सवं ॥ आनंदार्णवमग्नो सावायौ गुरुणा सह ॥३६॥ रामं राजीव
पत्राक्षं दृष्ट्वा हर्षाश्रुसंप्लुतः ॥ गुरुणा जातकर्माणि कर्त्तव्यानि चकार सः ॥३७॥ कैकेयी चाथ भरतम
सूत कमलेक्षणा ॥ सुमित्रायां यमौ जातौ पूर्णेंदुसदृशाननौ ॥३८॥ तदा ग्रामसहस्राणि ब्राह्मणेभ्यो मुदा
ददौ ॥ सुवर्णानि च रत्नानि वासांसि सुरभीः शुभाः ॥३९॥ यस्मिन् रमंते मुनयो विद्ययाज्ञानविप्लवे ॥ तं गु
५॥४०॥ रुः प्राह रामेति रमणाद्राम इत्यपि ॥ भरणाद्भरतो नाम लक्ष्मणं लक्षणान्वितं ॥ शत्रुघ्नं शत्रुहंतारमेवं गु
रुरभाषत ॥४१॥ लक्ष्मणो रामचंद्रेण शत्रुघ्नो भरतेन च ॥ द्वंद्वीभूय चरंतौ तौ पायसांशानुसारतः
॥४२॥ रामस्तु लक्ष्मणेनाथ विचरन् बाललीलया ॥ रमयामास पितरौ चेष्टितैर्मुग्धभाषितैः ॥४३॥ ॥

भक्तानां वपुः सौंदर्येण रमणाद्राम इत्यपि योग इति शेषः रमणं रामः ॥ भावे घञ् भूतं करोतीति राम इति तत्करोतीति णिच् र
मयतीति रामः ॥ णिजंताद् घञ् तथा च भक्तानू रमयतीति फलितोर्थः ॥४०॥४१॥ पायसांशानुसारतः कौशल्या पायसं
प्राप्ता तत्र लक्ष्मणरामानुच ॥४२॥ स्वर्णमया अश्वत्थपर्णस्य प्रांते संयुक्तानि पानि मुक्ताफलानि तैः ॥ प्रभाशोभा यस्य तं

रत्नमणीनां व्रातः समूहस्तन्मध्ये वर्त्तमानं यद्दीपिनखं तेनांचितं मंडितं यतु व्याघ्रबालगजान् सिंहानश्वोक्षमहिषान्
ष्वंभूषणेषु सज्जेद् दौःपदिष्ठे चिरंजीवितमिति तत्तु भूषणेषु व्याघ्राघाकारचित्रनिषेधपरं॥ न तु मुख्यव्याघ्राघवयवनि
षेधकमित्याहुः स्वर्णे संपन्नानि घटितानि रत्नानि यस्मिन् तत्॥ अर्जुनवृक्षस्य सटानुकमपकफलं तदाकारं॥ भूषणं
यस्य रत्नार्जुनशब्दाटुकमिति पाठांतरं अर्थे तुल्यः सिंजानाः शब्दयुक्ता ये मणयस्तद्युक्तैः मंजीरकटिसूत्रांगदैर्वृ

भाले स्वर्णमयाश्वत्थपर्णं मुक्ताफलप्रभं॥ कंठे रत्नमणिव्रातमध्यद्वीपिनखांचितं॥ ४४॥ कर्णयोः स्व
र्णसंपन्नरत्नार्जुनसटाकुलं॥ सिंजानमणिमंजीरकटिसूत्रांगदैर्वृतं॥ ४५॥ स्मितवक्त्राल्पदशनमिंद्र
नीलमणिप्रभं॥ अंगणे रिंगमाणं तं तर्णकाननु सर्वतः॥ ४६॥ दृष्ट्वा दशरथो राजा कौसल्यामुदे तदा
भोक्ष्यमाणे दशरथो राममेहीति चासह्वत्॥ ४७॥ आह्वयत्यति हर्षेण प्रेम्णा नायाति लीलया॥ आन
येति च कौसल्यामाह सास्मिता सुतं॥ ४८॥ धावत्यपि न शक्नोति स्प्रष्टुं योगिमनोगतिं॥ प्रहसन्स्वय
मायाति कर्दमांकितपाणिना॥ ४९॥ किंचिद्गृहीत्वा कवलं पुनरेव पलायते॥ कौसल्याजननी तस्य मासि
॥ मासि प्रकुर्वती॥ ५०॥ ॥ छ॥

तं मंजीरः पादभूषणं अंगदो बाहुभूषणं॥ ४५॥ स्मितं स्मितयुक्तं वक्त्रं यस्य स चासा
वल्पदशानश्चतं तर्णकान् गोवत्सान् अनु तत्पुच्छप्रांतरधरणात् सर्वतो रिंगमाणं परितो वालगत्यां खेलंतं॥ ४६॥ दृष्ट्वेति
ताहृष्टीर्ति तत्॥ क्रीडासिस्पर्धः॥ ४७॥ येम्पग आहूतोपीति शेषः लीलया क्रीडारसत्त्वया नायातीत्यर्थः॥ ४८॥ योगिमनोगतिं

योगिमनो विषयं कर्दमंकित पाणिनो पलक्षित इतिशेषः ॥४९॥५०॥ पुत्रादिकल्याणमुद्दिश्य पसधवाभ्यो दीपमान भक्ष्य विशेषा
वायनं वायनानि प्रकुर्वती बभूवेतिशेषः कर्णशष्कुली कर्णपूरण द्वयो भक्ष्य विशेषाः वर्षवृद्धिः ॥ वर्षारंभ दिन कर्त्तव्यं कर्म
५१॥ गृहकृत्यत्यागकारणं चापल्यमेव दर्शयतीति ॥ एकदेति ॥ मातरमंतिके मातुः समीपे इत्यर्थः द्वितीया छांदसी ५२॥

वायनानि विचित्राणि समलंकृत्य राघवं ॥ अपूपान्मोदकान्कृत्वा कर्णशष्कुलिकास्तथा ॥ कर्णपूरं
श्च विविधा वर्षवृद्धौ च वायनं ॥५१॥ गृहकृत्यं तथासक्ते तस्य चापल्यकारणात् एकदा रघुनाथो
सौ गतो मातरमंतिके ॥५२॥ भो जनं देहि मे मातर्न श्रुतं कार्यसक्तया ॥ ततः क्रोधेन भांडानि लकुटेनाहनत्त
दा ॥५३॥ शिक्यस्थं पातयामास गव्यं च नवनीतकं ॥ लक्ष्मणाय ददौ रामो भरताय [illegible] यथाक्रमं
५४॥ शत्रुघ्नाय ददौ पश्चाद्दधिदुग्धं तथैव च ॥ सूदेन कथितं मात्रे हास्यं कृत्वा प्रधावती ॥५५॥ आगतां
तां विलोक्याथ ततः सर्वैः पलायितं ॥ कौसल्याधावमानापि प्रस्खलंती पदे पदे ॥५६॥ रघुनाथं
करे धृत्वा किंचिन्नोवाच भामिनी ॥ बालभावं समाश्रित्य मंदं मंदं रुरोद ह ॥ ते सर्वे लालिता मात्रा गाढमा ५७॥
लिंग्य पल्लतः ॥ एवमानंदसंदोहो जगदानंदकारकः ॥५८॥ मायाबालवपुर्धृत्वा रमयामास दंपती
अथ कालेन ते सर्वे कौमारं प्रतिपेदिरे ॥५९॥

अहनत् अहनित्यर्थः ॥ गणकार्यस्यानित्यत्वान्न प्राप्योनुक ॥५३॥ गव्यं दधिदुग्धं ॥५४॥ सूदः सूपकारः मात्रे कौश
ल्यायैः ॥५५॥५८॥ दंपती कौशल्यादशरथौ कौमारं पंचवर्षाधिकं त्वं ॥५९॥ ॥ ॥ ॥ ॥ ॥

६०॥६१॥न करोतीत्यत्र हेतुरविकारी परिणामहीन इति अविकारीत्यस्यैव व्याख्यानं परिणामहीन इति॥६६॥इति टीका
यां तृतीयः सर्गः॥३॥अथ रामं नेतुं विश्वामित्रागमनमाह॥कदाचिदिति रामं स्वमायया जातं ज्ञात्वा तं द्रष्टुमभ्याग

उपनीता वसिष्ठेन सर्वविद्याविशारदाः॥धनुर्वेदे च निरताः सर्वशास्त्रार्थवेदिनः॥६०॥बभूवुर्जगतां ना
थालीलया नररूपिणः॥लक्ष्मणस्तु सदा राममनुगछति सादरं॥६१॥सेव्यसेवकभावेन शत्रुघ्नो भरतं
तथा॥रामश्चापधरो नित्यं तूणीबाणान्वितः प्रभुः॥६२॥अश्वारूढो वनं याति मृगयायै सलक्ष्मणः
हत्वा दुष्टमृगान्सर्वान्पित्रे सर्वं न्यवेदयत्॥६३॥प्रातरुत्थाय सुस्नातः पितरवभिवाद्य च॥पौरकार्या
णि सर्वाणि करोति विनयान्वितः॥६४॥बंधुभिः सहितो नित्यं भुक्त्वा मुनिभिरन्वहं॥धर्मशास्त्ररहस्या
नि शृणोति व्याकरोति च॥६५॥एवं परात्मा मनुजावतारो मनुष्यलोकाननुसृत्य सर्वं॥चक्रेविकारी
परि णामहीनो विचार्यमाणो न करोति किंचित्॥६६॥इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवा
दे बालकांडे तृतीयः सर्गः॥३॥कदाचित्कौशिकोभ्यागाद योध्यां ज्वलनप्रभः॥द्रष्टुं रामं परात्मा <श्रीमहादेवउ
नं जातं ज्ञात्वा स्वमायया॥१॥दृष्ट्वा दशरथो राजा प्रत्युत्थायाचिरेण तु॥वसिष्ठेन समागम्य पूजयित्वा य
थाविधि॥२॥

दित्यर्थः॥१॥अचिरेण शीघ्रं दर्शनाव्यवहितोत्तरकाले प्रत्युत्थाय वसिष्ठेन समागम्य सहितो भूत्वेति यावत्॥पूजने मुनिः
कर्मः॥२॥नाम्ना शरीरत्वेनन्नमधीत्वानुमानं तदागमनरूपात्कारणादित्यर्थः॥३॥तत्रैव तत् गृह एव भगवदाद्यगमन

रा०अ०बा०
२५

स्य सकलसंपत्स्मृतिवंधकदुरितनाशकत्वादिति भावः ॥ तत्करोमीति सत्यं ब्रवीति शेषः ॥ दृष्ट्वा पर्वप्राप्तिं ज्ञात्वा सु
रादीन्यष्टुं यदारभेतदेत्यन्वयः ॥ ६ ॥ तव श्रेयः ॥ तदैव तव श्रेय इत्यर्थः ॥ ७ ॥ पप्रच्छेत्यस्य विश्वामित्रवचोनंतर
मित्यादि ॥ ८ ॥ ९ ॥ यतः मत्संनिधानात् ॥ १० ॥ प्रत्याख्यातो यदीति भविष्यतीति शेषः ॥ श्रेयो रामवियोगकृतमरण

अभिवाद्य मुनिं राजा प्रांजलिर्भक्तिनम्रधीः ॥ कृतार्थोस्मि मुनींद्राहं त्वदागमनकारणात् ॥ ३ ॥ त्वद्वि
धा यत् गृहं यांति तत्रैवायांति संपदः ॥ यदर्थमागतोसि त्वं ब्रूहि सत्यं करोमि तत् ॥ विश्वामित्रोपि तं प्री
तः प्रत्युवाच महामतिः ॥ अहं पर्वणि संप्राप्ते दृष्ट्वा यष्टुं सुरान् पितृन् ॥ ५ ॥ यदारेभे तदा दैत्या विघ्नं कु
र्वंति नित्यशः ॥ मारीचश्च सुबाहुश्च परे चानुचरास्तयोः ॥ ६ ॥ अतस्तयोर्वधार्थाय ज्येष्ठं रामं प्रयच्छ
मे ॥ लक्ष्मणेन सह भ्रात्रा तव श्रेयो भविष्यति ॥ ७ ॥ वसिष्ठेन सहामंत्र्य दीयतां यदि रोचते ॥ पप्रच्छ
गुरुमेकांते राजा चिंतापरायणः ॥ ८ ॥ किं करोमि गुरो रामं त्यक्तुं नोत्सहते मनः ॥ बहुवर्षसहस्रांते क
ष्टेनोत्पादिताः सुताः ॥ ९ ॥ चत्वारोमरतुल्यास्ते तेषां रामोतिवल्लभः ॥ रामस्त्वितो गच्छति चेन्न जीवामि
कथंचन ॥ १० ॥ प्रत्याख्यातो यदि मुनिः शापं दास्यत्यसंशयः ॥ कथं श्रेयो भवेन्मह्यमसत्यं चापि नस्टये ॥ ११ ॥

भावरूपं असत्यं मुनिप्रत्याख्यानजं पापं तन्मूलं शापं च ॥ ११ ॥ अशिवेति रामः सर्वमपि मानुष एवेदानीं पुनरपि
मानुषो जात इति न किंतु सनातनो निर्विकारत्वात्सदैकरूपो यः ॥ परमात्मा स एव ब्रह्मणा पुरा प्रार्थितः ॥ सन्

राम०
२५

तव भवने जात इत्यन्वयः ॥१२॥१३॥ भगवदवतारयोग्यतामाह त्वंचितिति तेपाते तप्तवंतौ ॥१४॥ अयाम्यविषयौ या
म्यविषयानासक्तौ न ब्रह्मचर्यं सूचितं ॥१६॥ शेषो लक्ष्मणः शेषांशो लक्ष्मण इत्यर्थः ॥१७॥ शंखचक्रगदाभृतः

वसिष्ठ उवाच ॥ शृणु राजन्देवगुह्यं गोपनीयं प्रयत्नतः ॥ रामो न मानुषो जातः परमात्मा सनातनः ॥१२॥
भूमेर्भारावताराय ब्रह्मणा प्रार्थितः पुरा ॥ स एव जातो भवने कौसल्यायां तवानघ ॥१३॥ त्वं तु प्रजाप
तिः पूर्वं कश्यपो ब्रह्मणः सुतः ॥ कौसल्या चादितिर्देवमाता पूर्वं यशस्विनी ॥ भवंतौ तप उग्रं वै तेपा
थे बहुवत्सरं ॥१४॥ अयाम्यविषयौ विष्णुपूजाध्यानैकतत्परौ ॥ तदा प्रसन्नो भगवान्वरदो भक्त
वत्सलः ॥१५॥ वृणीष्व वरमित्युक्ते त्वं मे पुत्रो भवामलु ॥ इति त्वया याचितोसौ भगवान्भूतभावनः
१६॥ तथेत्युक्त्वा स पुत्रस्ते जातो रामः स एव हि ॥ शेषस्तु लक्ष्मणो राजन्राममेवान्वपद्यत ॥१७॥
जातौ भरतशत्रुघ्नौ शंखचक्रगदाभृतः ॥ योगमायापि सीतेति जाता जनकनंदिनी ॥१८॥ विश्वामि
त्रोपि रामाय तां योजयितुमागतः ॥ एतद्गुह्यतमं राजन्न वक्तव्यं कदाचन ॥१९॥ अतः प्रीतेन मनसा
पूजयित्वाथ कौशिकं ॥ प्रेषयस्व रमानाथं राघवं सह लक्ष्मणं ॥२०॥ वसिष्ठेनैवमुक्तस्तु राजा दशर
थस्तदा ॥ कृतकृत्यमिवात्मानं मेने प्रमुदितांतरः ॥२१॥ आहूय राम रामेति लक्ष्मणेति च सादरं ॥ आ
॥ लिंग्य मूर्ध्न्यवघ्राय कौशिकाय समर्प
यत् ॥२२॥

संबंधिनौ चक्रगरुडाविति शेषः ॥ तौ भरतशत्रुघ्नौ जातावित्यर्थः ॥१८॥१९॥
॥२०॥ प्रमुदितांतरः हृष्टचित्तः ॥२१॥ मूर्ध्न्य

वघ्रायेति प्रजापतेस्त्वा हिंकारेणावजिघ्रामि स
हस्रायुषासौ जीव शरदः शतमित्यवघ्राणमंत्र

लिंगेन तस्य पुत्राद्यायुर्वृद्धिकरत्वात्तत्करणमि
ति बोध्यं ॥२२॥

आगतौ स्वसमीपं प्राप्तौ रामलक्ष्मणौ ॥२३॥ गृहीत्वा याययौ जगामेति अर्थः ॥२४॥ बलामिति बलाविद्याप्राप्तौ रसामर्थ्यासं
पादानद्वारेष्टसाधिका बलं धेहितनुषुन इति मंत्रलिंगात् ॥ अतिबलातु संकल्पमात्रादिष्टजनिकेत्याहुः ॥२५॥२६॥ अति

ततोतिहृष्टो भगवान् विश्वामित्रः प्रतापवान् ॥ आशीर्भिरभिनंद्याथ आगतौ रामलक्ष्मणौ ॥२३॥ गृहीत्वा
चापतूणीरबाणखड्गधरौ ययौ ॥ किंचिद्देशमतिक्रम्य राममाहूय भक्तितः ॥२४॥ ददौ बलां चातिबलां
विद्ये द्वे देवनिर्मिते ॥ ययोर्ग्रहणमात्रेण क्षुत्क्षामादि न जायते ॥२५॥ ततउत्तीर्य गंगां ते ताटकावनमागमन्
विश्वामित्रस्तदा प्राह रामं सत्यपराक्रमं ॥२६॥ अत्रास्ति ताटका नाम राक्षसी कामरूपिणी ॥ बाधते
लोकमखिलं जहि तामविचारयन् ॥२७॥ तथेति धनुरादाय सगुणं रघुनंदनः ॥ टंकारमकरोत्तेन श
ब्देनापूरयद्वनं ॥२८॥ तच्छ्रुत्वा सहमाना सा ताटका घोररूपिणी ॥ क्रोधसंमूर्छिता राममभिदुद्राव मेघव
त् ॥२९॥ तामेकेन शरेणाशु ताडयामास वक्षसि ॥ पपात विपिने घोरा वमंती रुधिरं बहु ॥३०॥ ततो
तिसुंदरी यक्षी सर्वाभरणभूषिता ॥ शापात्क्षिणाच्च तां प्राप्ता मुक्ता रामप्रसादतः ॥३१॥ नत्वा रामं प
रिक्रम्य गता रामाज्ञया दिवं ॥३२॥ ततोतिहृष्टः परिरभ्य रामं मूर्द्धन्यवघ्राय विचिंत्य किंचित् ॥ स
र्वास्त्रजालं सरहस्यमंत्रं प्रीत्याभिरामाय ददौ मुनींद्रः ॥३२॥

॥विचारयन् स्त्रिया अवध्यत्वविचारयन्नित्यर्थः
२७॥ सगुणं आरूढज्यं तेन शब्देन धनुःशब्देन ॥२८॥ असहमानेति छेदः ॥ क्रोधसंमूर्छिता अतिक्रुद्धा ॥२९॥३०॥

॥३१॥३२॥ ततस्ताटकावधकर्मवशादतितुष्टो विश्वा
मित्रः ॥ किंचित् विचिंत्य रामगुरुत्वेन स्वस्यांतका

ले मुक्तिप्रदा । प्राप्तियोग्यता लाभं विचार्येत्यर्थः
अभिरामाय रामाय सरहस्यं मंत्रमस्त्र । जालं द
दावित्यन्वयः ॥३३॥

इतिश्रीबालकांडे टीकायां चतुर्थ सर्गः ॥४॥ तत्र कामाश्रमे तारकावधस्थानभूते कामाश्रमारण्ये कामस्य रुद्रेणानं
गतासंपादके वने तारकाभयाद्देवमुनिसंकुले ॥१॥ सिद्धाश्रमं विश्वामित्रवासस्थानं नाम नाश्रमारण्यं तन्निवासिनः
सिद्धाश्रमवासिनः ॥२॥ ३ कृत आगच्छतः कस्मिन् काले इति शेषः ॥ इहष्टा तेयष्टौ ॥४॥ द्वौ बाणौ संदधे ईषत्का

१ श्रीमहादेव उवाच ॥

इतिश्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे बालकांडे चतुर्थः सर्गः ॥४॥ तत्र कामाश्रमे रम्ये का
नने मुनिसंकुले ॥ उषित्वा रजनीमेकां प्रभाते प्रस्थिताः शनैः ॥१॥ सिद्धाश्रमं गताः सर्वे सिद्धचारणसे
वितं विश्वामित्रेण संदिष्टा मुनयस्तन्निवासिनः ॥२॥ पूजां च महतीं चक्रू रामलक्ष्मणयोर्द्रुतं ॥ श्रीरा
मः कौशिकं प्राह मुने दीक्षां प्रविश्यतां ॥३॥ दर्शयस्व महाभाग कुतस्तौ राक्षसाधमौ ॥ तथेत्युक्त्वा मु
निर्यष्टुमारेभे मुनिभिः सह ॥४॥ मध्याह्ने ददृशाते तौ राक्षसौ कामरूपिणौ ॥ मारीचश्च सुबाहुश्च व
र्षंतौ रुधिरास्थिनी ॥५॥ रामोपि धनुरादाय द्वौ बाणौ संदधे सुधीः ॥ आकर्णांतं समाकृष्य विससर्ज
तयोः पृथक् ॥६॥ तयोरेकस्तु मारीचं भ्रामयन् शतयोजनं ॥ पातयामास जलधौ तदद्भुतमिवाभव
त् ॥७॥ द्वितीयोग्निमयो बाणः सुबाहुमजयत्क्षणात् ॥ अपरे लक्ष्मणेनाशु हतास्तदनुयायिनः ॥८॥

५३

नांतरत्वेपि युगपदिव ॥६॥ जलधौ तत्समीपे संहर्तृणि योजनशतं क्षिप्तः ॥ सागरोघसीति वाल्मीकियुक्तेः ॥७॥ अ
ग्निमय आग्नेयास्त्रयुक्तः ॥ अजयत् हतवान् इति यावत् ॥८॥ ॥ ॥ ॥ ॥

९॥१०॥११॥१२॥ प्रशस्तं तन्नगरं धिरत्ति कस्मिंश्चित्सत्त्वेन स्थापितं ॥१३॥ महसत्त्वमिति दृढं गंगासमीपगमिति गौतमाश्र
मविशेषणं ॥१४॥ यत्र अहल्या तपश्चास्थिते सन्त्वयः ॥१५॥ नानाजंतुभिः नानाप्रकारैः क्षुद्रप्राणिभिरपीहीनं गौतमशापा
दितिभावः ॥१६॥१७॥१८॥ तपसा हरिमाराधयन्नस्थित इति शेषः ॥१९॥२०॥ अवात्सीत् वासं कृतवान् तां अहल्यां ध॥र्ष

पुष्पौघैरवाकिरन् देवा राघवं सहलक्ष्मणं ॥ देवदुंदुभयो नेदुस्तुष्टुवुः सिद्धचारणाः ॥९॥ विश्वामित्र
स्तु संपूज्य पूजार्हं रघुनंदनं ॥ अंके निवेश्य चालिंग्य भक्त्या बाष्पाकुलेक्षणः ॥१०॥ भोजयित्वा स
ह भ्रात्रा रामं पक्वफलादिभिः ॥ पुराणवाक्यैर्मधुरैर्निनाय दिवसत्रयं ॥११॥ चतुर्थेहनि संप्राप्ते कौ
शिको राममब्रवीत् ॥ राम राम महायशं द्रष्टुं गच्छामहे वयं ॥१२॥ विदेहराजनगरे जनकस्य महात्म
नः ॥ तत्र माहेश्वरं चापमस्ति न्यस्तं पिनाकिना ॥१३॥ द्रक्ष्यसि त्वं महासत्त्वं पूज्यसे जनकेन च ॥ इत्यु
क्त्वा मुनिभिस्ताभ्यां ययौ गंगासमीपगं ॥१४॥ गौतमस्याश्रमं पुण्यं यत्राहल्यास्थिता तपः ॥ दिव्य
पुष्पफलोपेतं पादपैः परिवेष्टितं ॥१५॥ मृगपक्षिगणैर्हीनं नानाजंतुविवर्जितं ॥ दृष्ट्वोवाच मुनिं
[illegible] श्रीमान् रामो राजीवलोचनः ॥१६॥ कस्यैतदाश्रमपदं भाति भास्वच्छुभं महत् ॥ पत्रपुष्पफ
लैर्युक्तं जंतुभिः परिवर्जितं ॥१७॥ आल्हादयति मे चेतो भगवन् ब्रूहि तत्त्वतः ॥१८॥

॥ यितुं उपभोक्तुं अंत
र मुन्यसान्निध्यरूपं प्रसुरासीदिति शेषः ॥२१॥ गौतमे गृहान्निर्गते सति मुनिवेषेण तद्गृहं प्रविश्य तामहल्यां ध

षयित्वोपभुज्य ॥ ॥

निरगात्तु नियरपि स्वमभ्यगमागात् ॥२२॥ स्वरूपेण स्वस्यात्मनो गौतमस्य रूपेण दुष्टात्मत्वे हेतुर्मद्रूपधरत्वं ॥२३॥
कामकिंकरं कामपरवशतया अयुक्तं कर्म करमि सर्पः ॥२४॥२५॥२६॥ शिलायां स्थिति लीनाभूत्त्वेति शेषः ॥२७॥२८॥

विश्वामित्र उवाच ॥ शृणु राम पुरा वृत्तं गौतमो लोकविश्रुतः ॥ सर्वधर्मभृतां श्रेष्ठस्तपसाराधयन्
हरिं ॥१९॥ तस्मै ब्रह्माददौ कन्यामहल्यां लोकसुंदरीं ॥ ब्रह्मचर्येण संतुष्टः शुश्रूषणपरायणां ॥२०॥
तया सार्धमिहावात्सीद्गौतमस्तपतां वरः ॥ शक्रस्तु तां धर्षयितुमंतरं प्रेप्सुरन्वहं ॥२१॥ कदाचिन्मुनिवे
षेण निर्गते गौतमे गृहात् ॥ धर्षयित्वाथ निरगात्त्वरितं मुनिरप्यगात् ॥२२॥ दृष्ट्वा यांतं स्वरूपेण मुनिः प
रमकोपनः ॥ पप्रच्छ कस्त्वं दुष्टात्मन् मम रूपधरोधमः ॥२३॥ सत्यं ब्रूहि न चेद्भस्म करिष्यामि न संशयः
सोऽब्रवीद्देवराजोहं पाहि मां कामकिंकरं ॥२४॥ कृतं जुगुप्सितं कर्म मया कुत्सितचेतसा ॥ गौतमः क्रोधता
म्राक्षः शशाप दिविजाधिपं ॥२५॥ योनिलंपट दुष्टात्मन् सहस्रभगवान्भव ॥ शप्त्वा तं देवराजानं
प्रविश्य स्वाश्रमं द्रुतं ॥२६॥ दृष्ट्वाहल्यां वेपमानां प्रांजलिं गौतमोऽब्रवीत् ॥ दुष्टे त्वं तिष्ठ दुर्वृत्ते शिलाया
माश्रमे मम ॥२७॥ निराहारा दिवारात्रं तपः परममास्थिता ॥ आतपानिलवर्षादिसहिष्णुः परमेश्वरं
॥२८॥ ध्यायंती राममेकाग्रमनसा हृदि संस्थितं ॥ नानाजंतुविहीनोयमाश्रमो मे भविष्यति ॥२९॥ एवं
१ के वर्षसहस्रेषु ह्यनेकेषु गतेषु च ॥ रामो दाशरथिः श्रीमानागमिष्यति सा नुजः ॥३०॥

॥२९॥ दयया स्वयमेवशा
पांतमाह ॥ एवमिति ॥३०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

त्वदाश्रयशिलां त्वत्त्वपाश्रयशिलां ॥३१॥३२॥ तदादि तत्सम्प्रति शुभे स्वाश्रमे दृष्या आस्ते इति शेषः ॥३३॥३४॥३५॥३६॥३७
चतुर्भुजमिति स्वस्य भगवता रत्नअसाघनायमध्ये चतुर्भुजरूपं कौशल्याभिश्च दर्शयित्वा पुनर्द्विभुजरूपेणैव स्थित इत्याह
धनुरिति ॥३८॥३९॥४०॥ हर्षजन्यं यदश्रुं रूजलं तद्युक्ते नेत्रांते यस्याः सा ॥४१॥ एतत् अस्तौषीन् ईउस्तुतौ इत्यस्मात्स्त्वडि·म

मा
यदा त्वदाश्रयशिलां पादाभ्यांक्रमिष्यति ॥ तदैव धूतपापा त्वं रामं संपूज्य भक्तितः ॥३१॥ परिक्रम्य नम
स्कृत्य स्तुत्वा शापाद्विमोक्ष्यसे ॥ पूर्ववन्मम शुश्रूषां करिष्यसि यथा सुखं ॥३२॥ इत्युक्त्वा गौतमः प्राग
द्धिमवंतं न·गोत्तमं ॥ तदाद्यहल्या भूतानामदृश्या स्वाश्रमे शुभे ॥३३॥ तव पादरजस्पर्शकांक्षते पव
नाशना ॥ आस्तेद्यापि रघुश्रेष्ठ तपो दुष्करमास्थिता ॥३४॥ पावय स्वमुनेर्भार्यामहल्यां ब्रह्मणः सुतां ॥ इ
त्युक्त्वा राघवं हस्ते गृहीत्वा मुनिपुंगवः ॥३५॥ दर्शयामास चाहल्यामुग्रेण तपसास्थितां ॥ रामः शि
लां पदा स्पृष्ट्वा तां चापश्यत्तपोधनां ॥३६॥ ननाम राघवोहल्यां रामोहमिति चाब्रवीत् ॥ ततो दृष्ट्वा र
घुश्रेष्ठं पीतकौशेयवाससं ॥३७॥ चतुर्भुजं शंखचक्रगदापंकजधारिणं ॥ धनुर्बाणधरं रामं लक्ष्म
णेन समन्वितं ॥ स्मितवक्त्रं पद्मनेत्रं श्रीवत्सांकितवक्षसं ॥३८॥ नीलमाणिक्यसंकाशं द्योतयं
तं दिशो दश ॥ दृष्ट्वा रामं रमानाथं हर्षविस्फारितेक्षणा ॥३९॥

॥ समेन शापोनुगभावः डलयोरेकश्रुतित्वा
त्त्रकारेच्चारणं ते तव पादाब्जसंलग्नरजःकरणात्तत्संबंधादहं कृतार्थास्मि मुक्तशापास्मि ॥ अहो इत्याश्चर्यं

अपरं स्वस्य कृतार्थत्वे हेतुमाह ॥ यत्ते पादपंकजं शंकरादिभिस्तदब्जाभाइंधितस्मानसैः पीडितामानसैः ॥ सदास्पृष्टं विमृग्यते तेतंहं स्पृशामीति च कृतार्थास्मि ॥ ४२ ॥ अहो इति ॥ आश्चर्यं विचित्रं ॥ वास्तवस्वरूपाननुगुणं तव चेष्टितं यतः ॥ अपाणिपादो जवनो ग्रहीतेति श्रुतेर्वस्तुतश्चरणादिवर्जितापि सन् संपूर्णः सर्वव्याप्तोपि सन् आनंदमयः तत्त्व

गौतमस्य वचः श्रुत्वा ज्ञात्वा नारायणं परं ॥ संपूज्य विधिवद्राममर्घ्यादिभिरनिंदिता ॥ ४० ॥ हर्षाश्रुजलनेत्रांता दंडवत्प्रणिपत्य सा ॥ उत्थाय च पुनर्दृष्ट्वा रामं राजीवलोचनं ॥ ४१ ॥ पुलकांकितसर्वांगा गिरा गद्गदयैलत ॥ अहल्योवाच ॥ अहो कृतार्थास्मि जगन्निवास ते पादाब्जसंलग्नरजःकणानहं ॥ स्पृशामि यत्पद्मजशंकरादिभिर्विमृग्यते रंधितमानसैः सदा ॥ ४२ ॥ अहो विचित्रं तव राम चेष्टितं मनुष्यभावेन विमोहयंज्जगत् ॥ चलस्यजस्रं चरणादिवर्जितः ॥ संपूर्णआनंदमायोतिमायिकः ॥ ४३ ॥ यत्पादपंकजपरागपवित्रगात्रा भागीरथी भवविरिंचिमुखान्पुनाति ॥ साक्षात्स एव मम दृग्विषयो यदास्ते किं वर्ण्यते मम पुराकृतभागधेयं ॥ ४४ ॥ मर्त्यावतारे मनुजाकृतिं हरिं रामाभिधेयं रमणीयदेहिनं ॥ धनुर्धरं पद्मविशाललोचनं भजामि नित्यं न परान्भजिष्ये ॥ ४५ ॥

पापि सन् जगत् ॥ आत्मनि मनुष्यबुध्युत्पादेन विमोहयन् ॥ मनुष्यभावेन चलसि क्रियामात्रोपलक्षणमिदं विराधाभासोत्र औपाधिकत्वेन तत्परिहारात् ॥ नन्वीदृशस्य मनुष्यभावः कथं तत्राहातिमायिक इति सकलमाया

वंध्यो आस्पृष्टः सकलजगद्रूपेण परिणमनसमर्थो महामायावानित्यर्थः एवं च भुरुमायिकमेवेदं तव शरीरं चलनादि च न त्वितरवदिति भावः ॥ ४३ ॥ यत्पा

देति विष्णोः पादप्रसूतेति पुराणोक्तेः ॥ ४४ ॥ रमणीयदेहेनमित्यर्थः ॥ ४५ ॥ ॥ ॥ ॥ ॥

मस्य पादो विश्वं ॥ पादोस्य विश्वा भूतानीति श्रुतेः ॥ तदेव पंचजनस्य रजः । रज इव सारांशः । यथा कमले सौगंध्यसंपादकतयो
त्तविद्यमान रज एव सारं एवं विश्वस्य सत्ताभानसंपादकतया ब्रह्मैव सारांशत्वाद्रजस्तच्छ्रुतिभिर्विमृग्यं श्रुतिशिरोरूप
निषत्स्वस्थत्वात्तस्येति भावः यन्नाम्नां मध्ये सारं नाम रामेति तस्य रसिकस्तद्विषयप्रीतिमान् ॥ भगवान् ऐश्वर्य धर्म यशो
लक्ष्मी ज्ञान वैराग्यवान् षण्णामेषां ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः । श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भगसंज्ञकत्वो

जर२

यसादपंकेजः श्रुतिभिर्विमृग्यं यन्नाभिपंकजभवः कमलासनश्च ॥ यन्नामसाररसिको भगवान्पुरा
रिस्तं रामचंद्रमनिशं हृदि भावयामि ॥ ४६ ॥ यस्यावतारचरितानि विरिंचिलोके गायंति नारदमुखा भ
वपद्मजाद्याः ॥ आनंदजाश्रुपरिसिक्तकुचाग्रसीमा वागीश्वरी च तमहं शरणं प्रपद्ये ॥ ४७ ॥ सोयं पर
त्मा पुरुषः पुराण एषः स्वयंज्योतिरनंत आद्यः ॥ मायातनुं लोकविमोहिनीं यां धत्ते परानुग्रह एष रामः
४८ ॥ अयं हि विश्वोद्भवसंयमानामेकः स्वमायागुणबिंबितो यः ॥ विरिंचिविष्ण्वीश्वरनामभेदान्
धत्ते स्वतंत्रः परिपूर्ण आत्मा ॥ ४९ ॥

क्तेः उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं चेति विद्यां च स वाच्यो भगवानित्युक्तो वा ॥ ४६ ॥ विचि। रंचिलोके ब्रह्मलो
के नारदमुखा ऋषयः भवपद्मजाद्या देवाश्च ॥ त्वच्चरितस्मरणजानंदाश्रुभिः सिक्ते कुचाग्रे चूचुके तथा सीमनी
प्रांतभागे च यया वागीश्वरी सरस्वती च गायतीति विपरीणतेनान्वयः ॥ ४७ ॥ सोयं रामः परमात्मा परः सर्वजीवेभ्यः ॥ प्राकृ
तेभ्यश्च अधिकः आत्मा पुरुषः पुरि शयनात्पुरुषः पुराणः सर्वदा विद्यमान इत्यर्थः ॥ एषः स्वयंज्योतिः ॥ स्वप्रकाशः अनं

तोऽविनाशी आद्यः सर्वकारणं परानुग्रहे परेषां मादृशा जनानामनुग्रहे कर्त्तव्यतया बुद्धिस्थे सति परमसुंदरत्वा गु
णैस्त्रैलोकविमोहनीं मायातनुं नत्वितरजनवत्पांचभौतिकिं धत्ते स एव एषः रामः उपासकानां कार्यार्थं ब्रह्मणो रू
पकल्पनेति श्रुतेः ॥४८॥ अयं हीति ॥ विश्वस्य जगतउद्भव उत्पत्तिः संयमो नाशस्ताभ्यां पालनमप्युपलक्ष्यते तेषां स्व
तंत्रः कर्त्तेति पाणिन्युक्तेः य एक एव परिपूर्णो व्यापक आत्मा स्वमायागुणेषु रजः सत्वतमः सुविंबितः प्रतिबिं
बितस्सन् विरिंच्यादिनामभेदात् धत्ते रजोगुणोपहितचैतन्यमेव ब्रह्मा सत्वगुणोपहितं विष्णुः तमोगुणयुक्तं रु
द्रः इति भावः ॥४९॥ हे राम तवांघ्रिपंकजं श्रियात्। प्रियत्वात् श्रिया वक्षसि धृतं लालितं च येनैकेन जगत्त्रयमा

नमोस्तु ते राम तवांघ्रिपंकजं श्रिया धृतं वक्षसि लालितं प्रियात्॥ आक्रांतमेकेन जगत्त्रयं पुरा ध्ये
यं मुनींद्रैरभिमानवर्जितैः॥५०॥ जगतामादिभूतस्त्वं जगत्त्वं जगदाश्रयः सर्वभूतेष्वसंसक्त एको भाति
भवान्परः॥५१॥

क्रांतं इदं विष्णुर्विचक्रमे त्रेधा निदधे पदमिति श्रुतेः यश्च असक्ताभिमानैर्मुनिभिर्ध्येयं तद्विष्णोः परमं पदं सदा प
श्यंति सूरय इति श्रुतेः तस्मै नमोस्त्विति स्पष्टः॥५०॥ जगतामिति आदिभूतः कारणत्वादिति भावः॥ जगत्वं जगद्रूपत्वा
देन त्वंपदोपात्तब्रह्मात्मता विधीयते सर्वं खल्विदं ब्रह्मेतिवत्॥ तत्र जगतो मिथ्याभूतत्वेन ब्रह्मसामानाधिकरण्या
नुपपत्तावपि तस्य अध्यस्तत्वेन जगद्बाधकत्वान्न दोषः एवं जगदारोपाधिष्ठानं त्वमिति स्पष्टः॥ तदेवाह जगदाश्रय
इति॥ इमाः प्रजाः सदायतनाः सत्प्रतिष्ठा इति श्रुतेः वास्तव आश्रयाऽश्रयिभावो नास्त्येवेत्याह सर्वभूतेषु संसक्त

इति एवं च श्रुत्युक्तं तदधिष्ठानत्वमध्यारोपित
मेवेति भावः अत एव भवानेकोऽद्वितीयो भाति प्र
काशते ॥५१॥

कारवाच्यस्त्वं तस्य वाचकः। प्रणव इति पातंजलसूत्रात् ॥ अवतीत्योमिति निरुपाधिकरक्षकत्वगुणेन स तद्वाच्यः यद्वा अ उ म् ओमिति ब्रह्मविष्णुशिवात्मत्वेन स तद्वाच्यः ॥ तुर्येण नादाख्यध्वनिना चास्य इदं ब्रह्मस्वरूपत एव तत्र निबद्धं पुस्तकद्वयेपि यद्वामि सोहमिति एद्वै सकाराणं हकाराणं लोपयित्वा ततः परसंधिं कुर्यात् पूर्वरूपं ततोसौ प्रणवो भवेदिति रीत्याह वा चोम विषय इति निर्धर्मकत्वाछन्याघसंभवेन स्वरूपतस्तज्ज्ञन्यबोधाविषय इत्यर्थः ॥ नन्वेवं तस्य वाचकः ॥ प्रणव इति पातंजलसूत्रासंगतिस्तत्राह वाच्येति वाच्येति वाच्यवाचकभेदेन तत्कल्पनया भवानेव मायया जन्मय इति कल्पितभेदेन कल्पितप्रणवे अस्तेव वाच्यत्वं गृहीत्वाया

ओंकारवाच्यस्त्वं राम वाचामविषयः पुमान् ॥ वाच्यवाचकभेदेन भवानेव जगन्मयः ॥५२॥ कार्य
कारणकर्तृत्वफलसाधनभेदतः ॥ एको विभासि राम त्वं मायया बहुरूपया ॥५३॥ त्वन्मायामोहित
धियस्त्वां न जानंति तत्त्वतः ॥ मानुषं त्वाऽभिमन्यंते मायिनं परमेश्वरं ॥५४॥

॥इमर्षे सूत्रोपपत्तिरिति भावः

२५ उक्तं जगन्मयत्वं मायिकमित्याह ॥ कार्येत्यादि कार्यं महतत्त्वादि कारणं मायारूपा मूलप्रकृतिः कर्तृत्वं तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं फलं स्वर्गनरकादि साधनं क्रत्वादि वेदादि एतद्भेदतः ॥ एकोपि त्वं बहुरूपया मायया उक्तभेदैर्युक्त इव भासि ॥ उक्तं च विष्णुपुराणे ॥ स एव मूलप्रकृतिर्व्यक्तरूपी जगच्च सः ॥ तस्मिन्नेव लयं सर्वं याति तत्र च तिष्ठति कर्त्ता क्रियाणां स च इज्यते क्रतुः स एव तत्कर्म फ

लं च तस्य यत् स्वर्गादि यत्साधनमप्यशेषतो हरेर्न किंचिद्व्यतिरिक्तमस्तीति ॥५३॥ नन्वीदृशो यं घहं तर्हि
लोको मां तथा किमिति न जानातीत्यत्राह त्वन्मायेति त्वद्विषया माययेत्यर्थः ॥ तदुक्तं विष्णुपुराणे सोहंस
त्वं जगच्चेदं सदेवासुरमानुषं ॥ अविद्यामोहितात्मा नमन्नेसाह आकाशवदिति ॥ अचलोऽक्रियः शुद्धो ज्ञान
स्वरूपः सत्सत्तास्वरूपः नित्यत्वमनादित्वं अव्ययत्वमनंतत्वं ॥५५॥ मूढा तमोगुणप्रधाना अतएवाज्ञा न मस्कु
र्यं त्वद्रूपज्ञानायेति भावः ॥५६॥ सक्ता निरंतरा ॥५७॥ पुरुषाध्यक्ष सकलपुरुषसाक्षिन् हृषीके हृषीकार

आकाशवत्त्वं सर्वत्र बहिरंतर्गतोऽमलः ॥ असंगो ह्यचलो नित्यः शुद्धो बुद्धः सदाव्ययः ॥५५॥ यो
षिन्मूढाऽहमज्ञाते तत्त्वं जाने कथं विभो ॥ तस्मात्ते शतशो राम नमस्कुर्यामनन्यधीः ॥५६॥
देव मे यत्र कुत्रापि स्थिताया अपि सर्वदा ॥ त्वत्पादकमले सक्ता भक्तिरेव सदास्तु मे ॥५७॥ नमस्ते
पुरुषाध्यक्ष नमस्ते भक्तवत्सला । नमस्तेस्तु हृषीकेश नारायण नमोस्तु ते ॥५८॥ भवभयहरमेकं भानु
कोटिप्रकाशं करधृतशरचापं कालमेघावभासं ॥ कनकरुचिरवस्त्रं रत्नवत्कुंडलाढ्यं कमलविशदने
त्रं सानुजं राममीडे ॥५९॥

णमिंद्रियाणामधिष्ठातः हृष्यंति विषयोरिति हृषीकाणींद्रियाणि हृषीकेशाभयेषु चेति विष्णुधर्मोक्तेः भातपा
हल्ययेतन्नाम स्मृतं ॥ नारं जीवसमूहोऽयनं स्थानं यस्यांतर्यामितया तत्र स्थितत्वान्नारायणः नयतीति नरः प्रोक्तः
परमात्मा सनातनः ॥ नराज्जातानि तत्त्वानि नारायणाति त्वत्तोविदुः ॥ तान्येव चायनं तस्य तेन नारायणः स्मृत इति
मनु ॥ आपो नारायणं तत्स्थितत्वाद्वा नारायणः । अस्य मंत्रस्य संसारभयनाशकत्वात्स्मरणं तदुक्तं नृसिंहपुराणे

नारायणाय नम इत्ययमेव सत्यं संसारघोरविषसं
हरणं मंत्र इति ॥५८॥ तदेवाह भवयेति भवभयं संसा
रभयं कालमेघो नीलमेघः ॥५९॥

सा अहल्या पतिं गौतमं ॥६०॥६१॥६२॥६३॥ मातृभ्रात्रित्यत्रानङ्भाव आर्षः भोगैकबद्धः आतुर इतिच्छेदः अत्र संधिरार्षः ॥६४॥ विश्वामित्र इति वयं गच्छाम इति प्राहेत्यन्वयः बहुवचनादेव ॥ रामलक्ष्मणयोरपि गमनकर्तृत्वं ।१

स्तुत्वैवं पुरुषं साक्षाद्राघवं पुरतः स्थितं ॥ परिक्रम्य प्रणम्याशु सानुज्ञाता ययौ पतिं ॥६०॥ अहल्यया कृतं स्तोत्रं यः पठेद्भक्तिसंयुतः ॥ समुच्यते खिलैः पापैः परं ब्रह्माधिगच्छति ॥६१॥ पुत्राद्यर्थे पठेद्भक्त्या रामं हृदि निधाय च ॥ संवत्सरेण लभते वंध्या अपि सुपुत्रकं ॥६२॥ सर्वान्कामानवाप्नोति रामचंद्रप्रसादतः ॥६३॥ ब्रह्मघ्नो गुरुतल्पगोपि पुरुषः स्तेयी सुरापोपि वा मातृभ्रातृविहिंसकोपि सततं भोगैकबद्धातुरः ॥ नित्यं स्तोत्रमिदं जपन्रघुपतिं भक्त्या हृदिस्थं स्मरन् ध्यायन्मुक्तिमुपैति किं पुनरसौ स्वाचारयुक्तो नरः ॥६४॥ सूत उवाच ॥ विश्वामित्रोथ तं प्राह राघवं सहलक्ष्मणं ॥ गच्छामो वत्स मिथिलां जनकेनाभिपालितां ॥१॥ दृष्ट्वा क्रतुवरं पश्चादयोध्यां गंतुमर्हसि ॥ इत्युक्त्वा प्रययौ गंगामुत्तर्तुं सहराघवः ॥ तस्मिन्काले नाविकेन निषिद्धो रघुनंदनः ॥२॥ नाविक उवाच ॥ क्षालयामि तव पादपंकजं नाथ दारुदृषदोः किमंतरं ॥ मानुषीकरणचूर्णमस्ति ते पादयोरिति कथा प्रथीयसी ॥३॥

६ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे बालकांडे अहल्योद्धारणंनाम पंचमः सर्गः ॥५

उत्तर्तुमित्यागशासनानित्यत्वादिडभावः नाविकेन नौतारकेण ॥२॥ दारुदृषदोः काष्ठपाषाणयोः मानुषीकरणचूर्णमिति ॥ शिलारूपाहल्यायाः पादस्पर्शमात्रेण मानुषदेहसंपादनात् ॥३॥ ॥ ॥

४ ॥ प्रातर्विदेहस्य पुरं गत्वेति शेषः ॥ ऋषिवाटं ऋषिवासस्थानं मार्गं ॥ ५ ॥ सोध्यायः गौतमपुत्रश्शतानंदसहितः
ही ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ मनोदिताः मयाप्रेरित इत्यर्थः ॥ ११ ॥ १२ ॥ १३ ॥ तेगृहे पूजितं धनुर्द्रष्टुकाम इदानीमागत इत्यन्वयः

पादांबुजं ते विमलं हि कृत्वा पश्चात्परं तीरमहं नयामि ॥ नो चेत्तरी सद्युवती मलेन स्याच्चेद्विभो वि
द्धि कुटुंबहानिः ॥ ४ ॥ इत्युक्त्वा क्षालितौ पादौ परं तीरं ततो गताः कौशिको रघुनाथेन सहितो मिथि
लां ययौ ॥ ५ ॥ विदेहस्य पुरं प्रातर्ऋषिवाटं समाविशत् ॥ प्राप्तं कौशिकमाकर्ण्य जनकोतिमुदान्वितः
६ ॥ पूजाद्रव्याणि संगृह्य सोपाध्यायः समाययौ ॥ दंडवत्प्रणिपत्याथ पूजयामास कौशिकं ॥ ७ ॥
पप्रच्छ राघवौ दृष्ट्वा सर्वलक्षणसंयुतौ ॥ द्योतयंतौ दिशः सर्वाश्चंद्रसूर्याविवापरौ ॥ ८ ॥ कस्यैतौ न
रशार्दूलौ पुत्रौ देवसुतोपमौ ॥ मनःप्रीतिकरौ मेद्य नरनारायणाविव ॥ ९ ॥ प्रत्युवाच मुनिः प्रीतो हर्ष
यन् जनकं तदा ॥ पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥ १० ॥ मखसंरक्षणार्थाय मयानीतौ
पितुः पुरात् ॥ आगच्छन् राघवो मार्गे ताटकां विश्वघातिनीं ॥ ११ ॥ शरेणैकेन हतवान्नोदितो मेति
विक्रमः ॥ ततो ममाश्रमं गत्वा मम यज्ञविहिंसकान् ॥ १२ ॥ सुबाहुप्रमुखान् हत्वा मारीचं सागरे
क्षिपत् ॥ ततो गंगातटे पुण्ये गौतमस्याश्रमे शुभे ॥ १२ ॥ गत्वा तत्र शिलारूपा गौतमस्य वधूः स्थि
ता ॥ पादपंकजसंस्पर्शात्कृता मानुषरूपिणी ॥ १३ ॥

॥ १३ ॥ श्रीगणेशाय नमः श्रीरामो जयति ॥ छ ॥

८ तेम्हे पूजितं धनुर्द्रष्टुकाम इदानीमागत इत्यन्वयः १७ तच्च सर्वै राजभिर्दृष्टं दृष्टमेव न त्वारोप्य ज्यं कृतमित्यंत्र श्रुतेन श्रुत
मित्यर्थः ॥१५॥ दृष्ट्वोत्तस्य धनुः कर्म यतः पितरं द्रष्टुमिच्छत्यतो योध्यां जिगमिषुरित्यन्वयः ॥१६॥ मंत्रिणां सुदामाख्यं

दृष्ट्वाहर्म्यं नमस्कृत्य तया सम्यक्प्रपूजितः ॥ इदानीं द्रष्टुकामास्ते गृहे माहेश्वरं धनुः ॥१४॥ पूजितं रा
जभिः सर्वैर्दृष्टमित्यनुशुश्रुवे ॥१५॥ अतो दर्शय राजेंद्र शैवं चापमनुत्तमं ॥ दृष्ट्वायोध्यां जिगमिषुः
पितरं द्रष्टुमिच्छति ॥१६॥ इत्युक्तो मुनिना राजा पूजार्हौ विति पूजया ॥ पूजयामास धर्मज्ञो विधि
दृष्टेन कर्मणा ॥ ततः संप्रेषयामास मंत्रिणं बुद्धिमत्तरं ॥१७॥ जनक उवाच ॥ शीघ्रमानय विश्वेश
चापं रामाय दर्शय ॥ ततो गते मंत्रिवरे राजा कौशिकमब्रवीत् ॥१८॥ यदि रामो धनुर्धृत्वा कोट्यामारो
पयेद्गुणं ॥१९॥ तदा मयात्मजा सीता दीयते राघवाय हि ॥ तथेति कौशिकोप्याह रामं संवीक्ष्य सस्मि
तं ॥२०॥ शीघ्रं दर्शय चापाग्र्यं रामायामिततेजसे ॥ एवं ब्रुवति मौनीशे आगताश्चापवाहकाः
२१ चापं गृहीत्वा बलिनः पंचसाहस्रसंख्यकाः ॥ घंटाशतसमायुक्तं मणिवज्रादिभूषितं ॥२२
दर्शयामास रामाय मंत्री मंत्रवतां वरः ॥ दृष्ट्वा रामः प्रहृष्टात्मा बध्वा परिकरं दृढं ॥२३॥
गृहीत्वा वामहस्तेन लीलया तोलयन्धनुः ॥ आरोपयामास गुणं पश्यत्स्वखिलराजसु ॥२४॥

१७॥१८॥१९॥ कौशिकोपि तथेति उक्त्वा वक्ष्यमाणमहेत्यन्वयः ॥२०॥ मौनीशे ऋषिश्रेष्ठे ॥२१॥२२॥ परिकरं
कटिवस्त्रबंधं ॥२३॥ गुणं ज्यां ॥२४॥ —॥

अखिलहृत्सारः अखिलप्राणिनां हिरण्यगर्भादीनां सकलब्रह्मांडस्थानां हृत्सारो बलं यस्य स तस्य मर्त्ये २५ मर्त्यमनुष्यलोकं ॥२६॥२७॥ रघूद्वहमालिंग्य राजातिहृष्टो जात इति शेषः सीतामातरो जनकपत्न्यः ॥ अंतःपुरजिरेत

ईषदाकर्षयामास पाणिना दक्षिणेन सः ॥ बभंजाखिलहृत्सारो दिशः शब्देन पूरयन् ॥२४॥ दिशश्च विदिशश्चैव स्वर्गं मर्त्यं रसातलं ॥ तदद्भुतमभूत्तत्र देवानां दिवि पश्यतां ॥२६॥ आच्छादयंतः कुसुमैर्देवास्तुतिभिरीडिरे ॥ देवदुंदुभयो नेदुर्ननृतुश्चाप्सरोगणाः ॥२७॥ द्विधाभग्नं धनुर्दृष्ट्वा राजालिंग्य रघूद्वहं ॥ विस्मयं लेभिरे सीतामातरोंतःपुराजिरे ॥२८॥ सीता स्वर्णमयीं मालां गृहीत्वा दक्षिणे करे ॥ स्मितवक्त्रा स्वर्णवर्णा सर्वाभरणभूषिता ॥ मुक्ताहारैः कर्णपत्रैः क्वणच्छुरितनूपुरा ॥२९॥ दुकूलपरिसंवीता वस्त्रांतर्व्यंजितस्तनी ॥ रामस्योपरि निक्षिप्य स्मयमाना मुदं ययौ ॥३०॥ ततो मुमुदिरे सर्वे राजदाराः स्वलंकृतं ॥ गवाक्षजालरंध्रेभ्यो दृष्ट्वा लोकविमोहनं ॥३१॥ ततोब्रवीन्मुनिं राजा सर्वशास्त्रविशारदः ॥ भो कौशिक मुनिश्रेष्ठ पत्रं प्रेषय सत्वरं ॥३२॥ राजा दशरथः शीघ्रमागच्छतु सपुत्रकः ॥ विवाहार्थं कुमाराणां सदारः सहमंत्रिभिः ॥ तथेति प्रेषयामास दूतांस्त्वरितविक्रमान् ॥३३॥

दंगणे आगताः किमिदमिति विस्मयमद्भुतरसं लेभिरे प्रापुः ॥२८॥ स्मितवक्त्रा स्मितपदे आर्षं आद्यचू स्मितयुक्ते वक्त्रे यस्याः सा कर्णपत्रैः कर्णभूषणैः

सीतोवाच ५

उपलक्षितेतिशेषः। चलितेनवक्रनतनुपुरं यस्याः सा आर्षः समासः ॥२९॥ निक्षिप्येत्यस्यमालाकर्म ॥३०॥ स्वलंकृतं लो
कविमोहनं रामं दृष्ट्वा मुमुदिरे इत्यन्वयः ॥३१॥ पत्रं संदेशप्रापकं लेखवत्स्वत्रसहितं दूतनमित्वर्याः ॥३२॥ यथा आगच्छे
ति ॥ यथायत्र प्रेषयेत्तन्नृपः ॥ स पत्रकः भरतादिसहितः ॥३३॥ राजशार्दूलं दशरथं रामश्रेयः विवाहरूपं ॥ रामकृतं

ते गत्वा राजशार्दूलं रामश्रेयो न्यवेदयन् ॥ श्रुत्वा रामकृतं राजा हर्षेण महता प्लुतः ॥३४॥ मिथि
लागमनायापि त्वरयामास मंत्रिणः ॥ गच्छंतु मिथिलां सर्वे गजाश्वरथपत्तयः ॥३५॥ रथमानय
मे शीघ्रं गच्छाम्यद्यैव माचिरं ॥ वसिष्ठस्त्वग्रतो यातु सदारः सहितोऽग्निभिः ॥३६॥ राममातॄः समा
दाय मुनिर्मे भगवान्गुरुः ॥ एवं प्रस्थाप्य सकलं राजर्षिर्विपुलं रथं ॥३७॥ महत्या सेनया सार्धमारु
ह्य त्वरितो ययौ ॥ आगतं राघवं श्रुत्वा राजा हर्षसमाकुलः ॥३८॥ प्रत्युज्जगाम जनकः शतानं
दपुरोधसा ॥ यथोक्तपूजया पूज्यं पूजयामास सत्कृतं ॥३९॥ रामस्तु लक्ष्मणेनाशु ववंदे चर
णौ पितुः ॥ ततो हृष्टो दशरथो रामं वचनमब्रवीत् ॥४०॥ दिष्ट्या पश्यामि ते राम मुखं फुल्लांबुजो
पमं ॥ मुनेरनुग्रहात्सर्वं संपन्नं मम शोभनं ॥४१॥

॥ धनुर्भंगं ॥३४॥ गजाश्वरथपतय इति मध्यमपदलो
पी समासः द्वंद्वश्चेति सूत्रे सेनांगशब्देन रथिकादीनामेव ग्रहणं न रथादीनामतो न दोषः अत एव संग्रामं ह
स्त्यश्वरथपदातिभिरिति अल्पाच्तर सूत्रस्य भाष्यप्रयोगः ॥ संगच्छते इत्यते राममातॄः कौशल्याद्याः प्रस्थाप्य

॥४०॥ फुल्लांबुजोपमं विकसितकमलसदृशं ॥४१॥

नगराद्बहिः संप्रेष्य रथमारुह्य तं यैव सेनया सा
र्धं ययाविसन्नृपः ॥३७॥३८॥ सतानंदपुरोधसा स
हेति शेषः यथोक्तपूजेयामेया शास्त्रोक्तपूजया ॥३९॥

ब्रह्मानंदं गतः प्राप्तः समाधाविति शेषः ॥४२॥४३॥४४॥ वितानं वासः कृतमंगणाच्छादनं मंडपोऽत्र विवाहशाला
४५॥ सुसंकीर्णे सुसंबाधे ॥४६॥ सुवासिन्यो जीवद्भर्तृकाः पतको रुचको रुक्मो निष्कं वक्षोविभूषणे रत्तिको
शाद्वसो विभूषणं निष्कं तत्कंठे पोसां ताभिः भेरी दुंदुभी वाद्यविशेषौ वितस्तित्रयदीर्घा ताम्रनिर्मिता चर्मछत्र

१ ग्य

इत्युक्त्वाघ्राय मूर्द्धानमालिंच पुनः पुनः ॥ हर्षेण महता विष्णोर्ब्रह्मानंदं गतो यथा ॥४२॥ ततो जनक
राजेन मंदिरे सन्निवेशितः ॥ शोभने सर्वशोभाढ्ये सदारः ससुतः सुखी ॥४३॥ ततः शुभे दिने ल
ग्ने सुमुहूर्ते रघूत्तमं ॥ आनयामास धर्मज्ञो रामं सभ्रातृकं तदा ॥४४॥ रत्नस्तंभे सुविस्तारे सुविता
ने सुतोरणे ॥ मंडपे सर्वशोभाढ्ये मुक्तापुष्पफलान्विते ॥४५॥ वेदविद्भिः सुसंबाधे ब्राह्मणैः स्वर्ण
५ कू भूषितैः ॥ सुवासिनीभिः परितो निष्ककंठीभिरावृते ॥४६॥ भेरीदुंदुभिनिर्घोषैर्गीतनृत्यैः समाकु
ले ॥ दिव्यरत्नांचिते स्वर्णपीठे रामं न्यवेशयत् ॥४७॥ वसिष्ठं कौशिकं चैव शतानंदः पुरोहितः ॥ य
थाक्रमं पूजयित्वा रामस्योभयपार्श्वयोः ॥४८॥ स्थापयित्वा स तत्राग्निं ज्वालयित्वा यथाविधि
सीतामानीय शोभाढ्यां नानारत्नविभूषितां ॥४९॥ सभार्यो जनकः प्रायाद्रामं राजीवलोचनं
पादौ प्रक्षाल्य विधिवत्तदपो मूर्ध्न्यधारयत् ॥५०॥

चतुर्विंशत्यंगुलवदना द्व्याभेरी वर्त्तुलचर्मवद्धैकानना दुंदुभिरिति वदंति ॥ रत्नाचिते रत्नघटिते ॥४७॥ रामस्यो
भयपार्श्वयोः स्थितं वसिष्ठं कौशिकं च यथाक्रमं पूर्वं वसिष्ठं ततः कौशिकमिति क्रमेण पूजयित्वेत्यन्वयः

सीतामानीय अग्रे कृत्वा सभार्यो जनको रामं प्रति
प्रायात् ॥ इत्यन्वयः ॥४९॥५०॥

याः गंगारूपाः ॥ ५१ ॥ सीतानाम्नी ते सुता तुभ्यं दीयते प्रीतो भवेति ॥ अनेन निष्कामतया भगवत्प्रीतये रामं दत्तं वानिति सूच्यते
५३ ॥ रामकरे सीतामर्पयन् जनको लक्ष्मीं विष्णुवेर्पयन् समुद्र इव मुमोद ॥ ५४ ॥ भ्रातृकन्यके कुशध्वजकन्यके ॥ ५५ ॥ ५६
५७ ॥ सीतामुखात् लांगूलाग्रकृतभूविवरात् ॥ ५८ ॥ पुत्रिकाभावेन भाविताम् ध्यातां ॥ ५९ ॥ महतां महतीं संज्ञां विश्वावसो

याध्यता मूर्ध्नि शर्वेण ब्रह्मणा मुनिभिः सदा ॥ ततः सीतां करे धृत्वा साक्षतोदकपूर्वकं ॥ ५१ ॥ रामाय प्रददौ
प्रीत्या पाणिग्रहविधानतः ॥ सीता कमलपत्राक्षी स्वर्णमुक्तादिभूषिता ॥ ५२ ॥ दीयते मे सुता तुभ्यं प्री
तो भव रघूत्तम ॥ इति प्रीतेन मनसा सीतां रामकरेर्पयत् ॥ ५३ ॥ मुमोद जनको लक्ष्मीं क्षीराब्धिरिव वि
ष्णवे ॥ ऊर्मिलां चौरसीं कन्यां लक्ष्मणाय ददौ मुदा ॥ ५४ ॥ तथैव श्रुतिकीर्तिं च माण्डवीं भ्रातृकन्यके भ
रताय ददावेकां शत्रुघ्नायापरां ददौ ॥ ५५ ॥ चत्वारो दारसंपन्ना भ्रातरः शुभलक्षणाः ॥ विरेजुः प्रभया
६ ला सर्वे लोकपा इवापरे ॥ ५६ ॥ ततोऽब्रवीद्वसिष्ठाय विश्वामित्राय मैथिलः ॥ जनकः स्वसुतोदंतं ना
रदेनाभिभाषितं ॥ ५७ ॥ यज्ञभूमिविशुध्यर्थं कर्षतो लांगलेन मे ॥ सीतामुखात्समुत्पन्ना कन्यका
शुभलक्षणा ॥ ५८ ॥ तामद्राक्षमहं प्रीत्या पुत्रिकाभावभाविताम् ॥ अर्पिता प्रियभार्यायै शरच्चंद्रनि
भानना ॥ ५९ ॥ राम०
३४

॥ स्तुबृहती तुंबुरोस्तु कलावती महती नारदस्य स्यात्सरस्वत्यास्तु कच्छपीत्युक्तेः ॥ ६० ॥ ६१ ॥ ६२
चतुर्धा रामलक्ष्मणभरतशत्रुघ्नरूपेण ॥ ६३ ॥ ६४ ॥ पूर्वभार्या अनादिशक्तिः ॥ सैव विष्णुरूपभरणादस्य भार्या दे

वगतिं देवलोकमार्गं ॥६४॥ पितामहशापेन तदा क्ष्यो वंशपाः ॥६७॥ इति चिंत्येत्येकं पदमिति स्पष्टो नानुपपत्तिः इति
विचार्य तथा कृतं पणभूतं तत्कृतमित्यर्थः ॥६८॥ ॥६९॥ यस्यपश्यामि तन्मे जन्म सफलमित्यन्वयः ॥७०॥ त्वत्प्रसादां तु गंगा

एकदा नारदोभ्यागाद्विविक्ते मयि संस्थिते ॥ रणयन्नमहतीं वीणां गायन्नारायणं विभुं ॥६०॥ पूजितः
सुखमासीनो मामुवाच सुखान्वितः ॥ शृणुष्व वचनं गुह्यं तवाभ्युदयकारणं ॥६१॥ परमात्मा हृषी
केशो भक्तानुग्रहकाम्यया ॥ देवकार्यार्थसिद्ध्यर्थं रावणस्य वधाय च ॥६२॥ जातो राम इति ख्यातो
मायामानुषवेषधृक् ॥ आस्ते दाशरथिर्भूत्वा चतुर्धा परमेश्वरः ॥६३॥ योगमायापि सीतेति जा
ता वै तव वेश्मनि ॥ अतस्त्वं राघवायैव देहि सीतां प्रयत्नतः ॥६४॥ नान्येभ्यः पूर्वभार्यैषा रामस्य प
रमात्मनः ॥ इत्युक्त्वा प्रययौ देवगतिं देवमुनिस्तदा ॥६५॥ तदारभ्य मया सीता विष्णोर्लक्ष्मीर्विभाव्यते
कथं मया राघवाय दीयते जानकी शुभा ॥६६॥ इति चिंतासमाविष्टः कार्यमेकमचिंतयम् ॥ मत्पि
तामहगेहे न्यासभूतमिदं धनुः ॥६७॥ ईश्वरेण पुरक्षिप्तं पुरदाहादनंतरं ॥ धनुरेतत्पणं का
र्यमिति चिंत्य कृतं तथा ॥६८॥ सीतापाणिग्रहार्थाय सर्वेषां माननाशनं ॥ त्वत्प्रसादान्मुनिश्रेष्ठ
रामो राजीवलोचनः ॥६९॥ आगतोऽत्र धनुर्द्रष्टुं फलितो मे मनोरथः ॥ अद्य मे सफलं जन्म राम त्वां स
ह सीतया ॥७०॥

॥ स्पष्ट ॥७१॥७२॥ अधिरक्षिता अधिको रक्षितेत्यर्थः ॥७३॥ यस्य रामस्य पादपंकजपरागेषु

सुतरां रागो येषां तैर्योगिवृंदैर्भवभयं संसारभयं जितं देवाः यन्नामकीर्त्तनेन पराजितदुःखशोकाः जाता इति शेषः ॥७४॥ दी
नाराणामिति दीनारे रूपकैरष्टाविंशतिसा परिकीर्त्तितः सुवर्णसप्ततितमो भागो रूपक इष्यत इति विह्लुगस्तोक्तः कासा

एकासनस्थं परपाति भ्राजमानं रविं यथा ॥ त्वत्सादं बुधरे अहल्यास्पृहि चक्रप्रवर्त्तकः ॥७१॥ बलिस्त्वत्सा
दसलिलं धृत्वा भूद्दिविजाधिपः ॥ त्वत्पादपांसुसंस्पर्शाद्दहल्या भर्तृशापतः ॥७२॥ सद्य एव विनिर्मुक्ता
कोन्यस्त्वत्तोधिरक्षिता ॥७३॥ यत्पादपंकजपरागसुरागयोगिवृंदैर्जितं भवभयं जितकालचक्रैः
यन्नामकीर्त्तनपराजितदुःखशोका देवास्तमेव शरणं सततं प्रपद्ये ॥७४॥ इति स्तुत्वा नृपः प्रादाद्रा
घवाय महात्मने ॥ दीनाराणां कोटिशतं रथानामयुतं तथा ॥७५॥ अश्वानां नियुतं प्रादाद्गजा
नामष्टशतं तथा ॥ पत्तीनां लक्षमेकं तु दासीनां त्रिशतं ददौ ॥७६॥ दिव्यांबराणि हाराश्च मुक्ताहार
लमयोज्ज्वलान् ॥ सीतायै जनकः प्रादात्प्रीत्या दुहितृवत्सलः ॥७७॥ वसिष्ठादीन्सुसंपूज्य भरतं
लक्ष्मणं तथा ॥ पूजयित्वा यथान्यायं तथा दशरथं नृपं ॥७८॥ प्रस्थापयामास नृपो राजानं र
घुसत्तमं ॥ सीतामालिंग्य रुदतीं मातरः साश्रुलोचनाः ॥७९॥

॥ यनस्तु कार्षापणश्चतुर्भिस्तु विज्ञेयो
धान्यको बुधैः ॥ ते द्वादश सुवर्णं तु दीनारस्तु त्रिकः स्मृत इति कार्षापणो दक्षिणस्यां दिशि रोप्यः प्रवर्त्तते पणो
निबद्धः पूर्वस्यां षोडशैव पणाः ॥ सा विंशतिषोडशपणरूप्यं दक्षिणस्यः कार्षापण इत्यर्थः अयुतं दशसहस्रं ॥७५

नियुतं दशप्रा[illegible]लक्षं ॥ ७६ ॥ मुक्तारत्नमयोज्ज्वलान् हारान् निसन्वयः ॥ ७७ ॥ पूजयित्वा यथोचितधनदानैरित्यर्थः
७८ ॥ ७९ ॥ पातिव्रत्यं पुराणाद्युक्तपतिव्रताधर्मभर्त्रादिवाक्यामुहूर्त्ते घुनादिस्वरूपं वसेति छेत्येवं शिक्षयामासुरिति शेषः
८० ॥ आनकोदुंदुभिः तत्प्रभृतितूर्यसंबंधिघोषः स्वर्वासिनां भेर्यादिशब्दैः सम्मूर्छितो मिश्रितः सन्प्राणिनां भयंक

श्वश्रूश्वशुश्रूषणपरा नित्यं राममनुव्रता ॥ पातिव्रत्समुपालंब्य तिष्ठ वत्से यथासुखं ॥ ८० ॥ प्रयाण
काले रघुनंदनस्य भेरीमृदंगानकतूर्यघोषः ॥ स्वर्वासिभेरीघनतूर्यशब्दैः संमूर्छितो भूतभयंकरो
भूत ॥ ८२ ॥ इति श्रीमदध्यात्मरामायणे बा० उमामहेश्वरसंवादे षष्ठः सर्गः ॥ ६ ॥ सूत उवाच ॥ अथ
गच्छति श्रीरामे मैथिलाद्योजनत्रयं ॥ निमित्तान्यतिघोराणि ददर्श नृपसत्तमः ॥ १ ॥ नत्वा वसिष्ठं पप्र
च्छ किमिदं मुनिपुंगव ॥ निमित्तानीह [illegible] दृश्यंते विषमाणि समंततः ॥ २ ॥ वसिष्ठस्तमथ प्राह
भयमागामि सूच्यते ॥ पुनरप्यभयं तेद्य शीघ्रमेव भविष्यति ॥ ३ ॥ मृगाः प्रदक्षिणं यांति पश्य त्वां
शुभसूचकाः ॥ इत्येवं वदतस्तस्य ववौ घोरतरोऽनिलः ॥ ४ ॥ मुहूर्तेन चक्षूंषि सर्वेषां पांसुवृष्टिभि
रर्दयन् ॥ ततो व्रजन् ददर्शाग्रे तेजोराशिमुपस्थितं ॥ कोटिसूर्यप्रतीकाशं विद्युत्पुंजसमप्रभं
तेजोराशिं ददर्शाथ जामदग्न्यं प्रतापवान् ॥ ६ ॥

रोऽभूत् ॥ घनं कांस्यतालादि ॥ ८१ ॥ इति श्रीमदध्यात्मरामायणे० टीकायां षष्ठः सर्गः ॥ ६ ॥ मैथिलात् मैथिल
पुरात् घोराणि निमित्तानि अथ अशुभसूचका उत्पाताः ॥ १ ॥ २ ॥ ३ ॥ मृगास्त्वां प्रदक्षिणं यांति पश्येत्यन्वयः ॥ ४

मुह्यन् दर्शनशक्तिरहितानि कुर्वन् ॥ ५ ॥

८ ॥५॥

रा० बा० अ०
३६

ई॥ अंतकं अंतकर्त्तारं कालमिव॥७॥८॥९॥ राजानमनादृत्य रघूत्तममुवाचेत्यन्वयः॥ मे नाम्ना मदीयनाम्ना प्रसि
द्धः सन् पृथ्वीं चरसि॥ अतो मन्नामहारकत्वान्मच्छत्रुरसि एवमपि क्षत्रियत्वाभिमानश्चेत्तर्हि द्वंद्वयुद्धं प्रयच्छ॥ ११

नीलमेघनिभं प्रांशुं जटामंडलमंडितं॥ धनुःपरशुपाणिं च साक्षात्कालमिवांतकं॥६॥ कार्त्तवी
र्यांतकं रामं दृप्तक्षत्रियमर्द्दनं॥ प्राप्तं दशरथस्याग्रे कालमृत्युमिवापरं॥७॥ तं दृष्ट्वा भयसंत्रस्तो रा
जा दशरथस्तदा॥ अर्घ्यादिपूजां विस्मृत्य त्राहि त्राहीति चाब्रवीत्॥८॥ दंडवत्प्रणिपत्याह पुत्रप्रा
णं प्रयच्छ मे॥ इति ब्रुवंतं राजानमनादृत्य रघूत्तमं॥९॥ उवाच निष्ठुरं वाक्यं क्रोधात्प्रचलितेंद्रियः
त्वं राम इति नाम्ना मे चरसि क्षत्रियाधम॥१०॥ द्वंद्वयुद्धं प्रयच्छाशु यदि त्वं क्षत्रियोसि वै॥ पुराणं ज
र्जरं चापं भंक्त्वा त्वं कत्थसे मुधा॥११॥ अस्मिन् स्थिते वैष्णवे चापे आरोपयसि चेद्गुणं॥ तदा युद्धं त्वया
सार्द्धं करोमि रघुवंशज॥१२॥ नो चेत्सर्वान् हनिष्यामि क्षत्रियांतकरो ह्यहं॥ इति ब्रुवति वै तस्मिन्
चचाल वसुधा भृशं॥१३॥ अंधकारो बभूवाथ सर्वेषामपि चक्षुषां॥ रामो दाशरथिर्वीरो वीक्ष्य तं
भार्गवं रुषा॥१४॥ धनुराच्छिद्य तद्धस्तादारोप्य गुणमंजसा॥ तूणीराद्बाणमादाय संधायाकृष्य वीर्यवान्॥१५॥

त्वयि युद्धायोद्यते पितावनयोस्त्रेयावने परीक्षां न प्राप्स्ये वैष्णवचापारोपणेन तुल्यबलं विज्ञाय त्वया योत्स्यामी
साहतदस्युरुभिति तत्र तवासामर्थ्ये तुल्वदीयसकलवधः प्रसक्त इति भावः॥१२॥१३॥ सर्वेषामपि चक्षुषां सर्वसंबं
धि चक्षुषामित्यर्थः॥१४॥ १५॥

रा
३६

लक्ष्यं भेद्यं ॥१६॥ लोकान्तपोर्जितान् परलोकगतिमिति यावत् ॥ पादयुगं चरणयुगलं ॥ इहलोके तीर्थादिगतिमि-
ति यावत् ॥ ममाज्ञयेत्यनेन स्वस्य स्वरूपाविर्भावं सूचयति उक्तमेवार्थं स्फुटमाह ॥ अयमिति यद्यप्यत्वया अ

उवाच भार्गवं रामः शृणु ब्रह्मन्वचो मम ॥ लक्ष्यं दर्शय बाणस्य ह्यमोघो मम सायकः ॥१६॥ लोका-
न्पादयुगं वापि वद शीघ्रं ममाज्ञया ॥ एवं वदति श्रीरामे भार्गवो विहताननः ॥१८+॥ अयं लोकः
परो वाथ त्वया गंतुं न शक्यते ॥१७॥ एवं त्वां हि प्रकर्त्तव्यं वद शीघ्रं ममाज्ञया + ॥ संस्मरन्पूर्ववृत्तांत-
मिदं वचनमब्रवीत् ॥ राम राम महाबाहो जाने त्वां परमेश्वरं ॥१९॥ पुराणपुरुषं विष्णुं जगत्सर्ग-
लयोद्भवं ॥ बाल्येऽहं तपसा विष्णुमाराधयितुमंजसा ॥२०॥ चक्रतीर्थं शुभं गत्वा तपसा विष्णु-
मन्वहं ॥ अतोषयं महात्मानं नारायणमनन्यधीः ॥२१॥ ततः प्रसन्नो देवेशः शंखचक्रग-
दाधरः ॥ उवाच मां रघुश्रेष्ठ प्रसन्नमुखपंकजः ॥२२॥ श्रीभगवानुवाच ॥ उत्तिष्ठ तपसो ब्रह्म-
न्फलितं ते तपो महत् ॥ मच्चिदंशेन युक्तस्त्वं जहि हैहयपुंगवं ॥२३॥ कार्त्तवीर्यं पितृहणं यद-
र्थे तपसः श्रमः ॥ ततस्त्रिः सप्तकृत्वस्त्वं हत्वा क्षत्रियमंडलं ॥२४॥ कृत्स्नां भूमिं कश्यपाय दत्वा
शांतिमुपावह ॥ त्रेतायुगे दाशरथिर्भूत्वा रामोऽहमव्ययः ॥२५॥

॥ यैतदनंतरमयं लोकः परो वा गंतुं न
शक्यते एवं तथापि त्वां प्रति मम कर्त्तव्यं मम वर्त्तते तच्छीघ्रं वदेत्यर्थः ॥१७॥ विहताननः प्राप्तपराभवत्वादिति शेषः ॥
१८ ॥ १९ ॥ पुराणपुरुषं अनादित्वात् नवद्वारासु सर्वपूर्षु शयनाच्च विष्णुं व्यापकं अंतर्बहिश्च सर्वत्र प्रविष्टं वा

जगत्सर्गलयोद्भवं जगतः सृष्टिसंहारस्थितयो यस्मात्तं ॥ २०॥२१॥२२॥ फलितं फलसमर्थं जातं मच्चिदंशे-

न मद्रूपश्चिदाख्यया यद्वा कयंशेन ॥२३॥ ततपसः श्रमः
तपोरूपः श्रमः राहोः शिर इति वत् ॥२४॥२५॥

ए०अ०रा० १परया शक्त्या त्वयि विद्यमानशक्त्यंशादधिक्याच्छक्त्या ततो दर्शनानंतरं भयात्त्वयि दत्तं मत्तेजः पुरा यदा पुनरादास्ये त
३७ देत्यन्वयः ॥२६॥ ब्रह्मणो दिनं चतुर्युगसहस्रात्मकं ॥२७॥ स एव पुराण मवदरद एव ॥२८॥ मम प्रीतोसि मया प्रत्यभिज्ञातोसी
त्यर्थः ननु मत्प्रत्यभिज्ञायाः किमेवं दौर्लभ्यं येनैव संभ्रमस्तत्राह ॥ ब्रह्मादिभिरिति भवल्लभ्यत्वे हेतुः प्रकृतेः पारगति
२९॥ जन्मादिषड्भावाः जायतेस्ति विपरिणमते वर्धते ऽपक्षीयते नश्यतीत्येवंरूपाः षट् भावविकारास्ते यतस्त्वं

उत्पत्स्ये परया शक्त्या तदा द्रक्ष्यसि मां ततः ॥ मत्तेजः पुनरादास्ये त्वयि दत्तं मया पुरा ॥२६॥ तदा तप
श्चर लोके तिष्ठ त्वं ब्रह्मणो दिनं ॥ इत्युक्त्वांतर्दधे देवस्तथा सर्वं कृतं मया ॥२७॥ स एव विष्णुस्त्वं राम जा
तोसि ब्रह्मणार्थितः ॥ मयि स्थितं तु त्वत्तेजस्त्वयैव पुनराहृतं ॥२८॥ अद्य मे सफलं जन्म प्रतीतोसि मम
मम प्रभो ॥ ब्रह्मादिभिरलभ्यस्त्वं प्रकृतेः पारगो मतः ॥२९॥ त्वयि जन्मादिषड्भावा न संत्यज्ञानसंभवाः
निर्विकारोसि [illegible] पूर्णस्त्वं गमनादिविवर्जितः ॥३०॥ यथा जले फेनजालं धूमो वह्नौ तथा त्वयि ॥ त्वदाधार
त्वद्विषया माया कार्यं सृजस्यहो ॥३१॥

१पूर्णज्ञानेनातो ज्ञानसं[illegible]भवास्ते त्वयि न संति यतस्ते त्वयि न संति
अतस्त्वं निर्विकारो गमनादिविवर्जितश्चासि ॥३०॥ ननु तेजोहरणादिक्रियाया इदानीमेवोक्तेः । कथं निष्क्रियत्वम राम०
त आह ॥ यथेति ॥ यथा अंबुदेरंबुजलादौ फेनजालादि औपाधिकं तथा त्वयि क्रियोपाधिकीत्यर्थः ॥ उपाधिमेवाह ३७
त्वदाधारेति अन्यान्प्रति त्वामावृणोतीति त्वद्विषया अस्वतंत्रतया त्वदधीनत्वात् त्वदाधारा चेति भावः ॥३१॥

उक्तं तद्विषयत्वमेव दर्शयति यावदिति साकुतस्तत्राह अविचारितसिद्धेति अनादिसिद्धाऽविचारेणैव सिद्धेति अनादिः
सेतिभावः सैव माया विद्याब्रह्मज्ञानं तद्विरोधिनी तस्मिन्सति नश्यति तदुत्पत्तिं प्रतिबध्नाति चातोऽविद्यापदेनोच्य
ते इत्यर्थः विद्याविद्ये श्रुतिप्रोक्ते एकत्वान्यधियौ हते इति अभियुक्ताः ॥३२॥ कार्यं स्रजत्यहो इत्युक्तं तत्कार्यं दर्शयति
अविद्यते आदिनेंद्रियादितत्संघातावच्छिन्नेंतःकरणे प्रतिबिंबिता अनिर्वाच्येन संबंधेन संबद्धा चिच्छक्तिः प्राण
दिप्रेरकत्वेन प्राणधारकतया जीव इत्युच्यते जीव प्राणधारणे इति धातोः ॥३३॥ ननु चिच्छक्तेरक्रियत्वेन जीवेक

यावन्मायावृता लोकास्तावत्त्वां न विजानते ॥ अविचारितसिद्धैषाऽविद्याविद्याविरोधिनी ॥३२॥ अवि
द्याकृतदेहादिसंघाते प्रतिबिंबिता ॥ चिच्छक्तिर्जीवलोकेऽस्मिन्जीव इत्यभिधीयते ॥३३॥ यावद्देहमनः
प्राणबुद्ध्यादिष्वभिमानवान् ॥ तावत्कर्त्तृत्वभोक्तृत्वसुखदुःखादिभाग्भवेत् ॥३४॥ आत्मनः संसृ
तिर्नास्ति बुद्धेर्ज्ञानं न जात्विति ॥ अविवेकाद्द्वयं युंक्त्वा संसारीति प्रवर्त्तते ॥३५॥

र्त्त्वादिव्यवहारेण कतम
त आह यावदिति अभिमानोऽहमिति बुद्धिः या विवेकाभावमूलको देहादिसंघातेऽहमित्यभिमानस्तावत्कर्त्तृ
त्वाद्यारोपेण तद्वानिवेत्यर्थः ॥३४॥ विशिष्ट एव कर्त्तृत्वादीत्युक्तमर्थं प्रत्येकं तन्निषेधेन द्रढयति आत्मन इति
संसृतिः। कर्त्तृत्वभोक्तृत्वाद्यभिमानकृतः संसारो नास्ति अपरिणामित्वादितिभावः॥ एवं बुद्धेर्ज्ञानं न तद्वत्त्वादि
तिभावः। तस्माद्द्वयं युक्त्वाऽहमिति बुद्ध्या गृहीत्वा तत्र हेतुरविवेकः॥ संसारी जीवः इति अहं कर्त्ता भोक्तेत्यादिरू

पेण प्रवर्त्तते व्यवहरतीति तदुक्तं न बुद्धेरेव बोधो
स्ति नात्मनो विद्यते क्रिया अतो नान्यतरस्यापि जा
नातीति न युज्यत इति ॥३५॥ ॥

नन्वेवं बुद्धेश्चितीसंज्ञानइति ॥ धातुनिष्पन्नचित्तव्यवहारानुपपत्तेरत आह । जडस्येति न चेवमहमज्ञ इति व्यवहारानुपप
त्तिरत आह तथाचितेर्जडसंयोगाज्जडत्वं संमेलने मिथोन्योन्यधर्मतिरोभावे दृष्टांतमाह जलाग्न्योर्मेघविद्युज्जलयोर्य
थेत्यर्थः । विद्युतः प्रकाशं ज्ञातमपि जलं आवृणोति जलस्वरूपं जडमपि अग्निसंयोगाद्विद्युद्रूपेण प्रकाशरूपतां प्रा
प्नोतीत्यर्थः ॥ ३६ ॥ नन्वेवं यदि संसक्तस्तर्हि कथं मुच्यते तत्राह ॥ यावदिति संगसौख्यं संगाज्जायमानं सुखं न विंदति
न प्राप्नोति तावदित्यर्थः । सौख्यमिति स्वार्थे ष्यञ् ॥ निवर्त्तेदिति परस्मैपदमार्षं ॥ ३७ ॥ सतां संगेन लब्धया भक्त्या त्वां

जडस्य चित्समायोगाच्चित्त्वं भूयाच्चितिस्तथा ॥ जडसंगाज्जडत्वं हि जलाग्न्योर्मेलनं यथा ॥ ३६ ॥ याव
त्संसारभक्तानां संगसौख्यं न विंदति ॥ तावत्संसारदुःखौघान्न निवर्त्तेन्नरः सदा ॥ ३७ ॥ सत्संगेलब्ध
याभक्त्या यदा त्वां समुपासते ॥ तदा माया शनैर्याति तानवं प्रतिपद्यते ॥ ३८ ॥ ततस्त्वत्ज्ञानसंपन्नः
सद्गुरुस्तेन लभ्यते वाक्यज्ञानं गुरोर्लब्ध्वा त्वत्प्रसादाद्विमुच्यते ॥ ३९ ॥

॥ यदा जनाः समुपासते तदा तेभ्यो
मायाशनैर्मंदं याति ॥ अपसहरति विक्षेपशक्तिं त्यजतीत्यर्थः ॥ अतएव सा तानवं क्षीणत्वं प्रतिपद्यते ॥ ३८ ॥
तव ज्ञानमभेदेन यस्तद्युक्तः सद्गुरुस्त्वद्भक्तियोगात्तेन लभ्यते ॥ तदनंतरं तादृशाद्गुरोः सकाशाद्वाक्यज्ञानं तत्त्वमसी
तिवाक्यार्थीखंडार्थज्ञानं त्वत्प्रसादात् लब्ध्वा विमुच्यते ॥ आचार्यवान्पुरुषो वेदेति श्रुतेः उपदेक्ष्यंति ते ज्ञानं
ज्ञानिनस्तत्त्वदर्शिन इति स्मृतेश्च ॥ ३९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मुक्तिशंकामुक्तिप्राप्तिसंभावनापि नः सुखंतथानैवेत्यर्थः ॥४०॥ भक्तिकारणं भक्तिमत्संगः याभ्यांभक्तिमत्संगत
ज्जन्मभक्तिभ्यामविद्यासाक्षात्परंपरयाच मिलितानश्यति ॥४१॥ त्वद्धर्मस्तत्वज्ञानंतद्रूपामृतवर्षिणा शीलास्त
दुपदेष्टारस्तेन तेषांतत्वमर्थसिद्धं ॥४२॥ कारुणिकेति संबोधनंप्रकृतोपयोगाय ॥४३॥ तवत्राणायभूयात्तत्व

तस्मात्वद्भक्तिहीनानांकल्पकोटिशतैरपि ॥ नमुक्तिशंकाविज्ञानशंकानैवसुखंतथा ॥४०॥ अत्र
तस्त्वत्पादयुगलेभक्तिर्मेजन्मजन्मनि ॥ स्यात्वद्भक्तिमतां संगोऽविद्यायाभ्यांविनश्यति ॥४१॥ लोके
त्वद्भक्तिनिरतास्त्वद्धर्मामृतवर्षिणः ॥ पुनंतिलोकमखिलंकिंपुनःस्वकुलोद्भवान् ॥४२॥ नमो
स्तुजगतांनाथनमस्तेभक्तिभावन: ॥ नमःकारुणिकानंतरामचंद्रनमोस्तुते ॥४३॥ देवयद्यत्कृतं
पुण्यंमायालोकजिगीषया ॥ तत्सर्वंतवत्राणायभूयाद्रामनमोस्तुते ॥४४॥ ततःप्रसन्नोभगवा
नुश्रीरामःकरुणामयः ॥ प्रसन्नोस्मितवब्रह्मन् यत्तेमनसिवर्त्तते ॥४५॥ ॥ छ ॥

त्राणनार्थंभूयादित्यर्थः ॥ अनेनसर्वकर्मक्षयेणमुक्तिंदेहीतिव्यंग्यं ॥४४॥ तद्व्यंग्यंबुध्वातद्दानंभगवानत्र
तिजानितेतइत्यादि ॥४५॥ अत्रत्वत्कामदाने ॥४६॥ सोपिमुक्तिकारणंसंपदंप्रार्थयतेयदीति ॥ मेधुसूदनेन
मोक्षप्रति ॥ ॥

तिबंधकमूलकर्मनाशने त्वं समर्थ इति व्यज्यते ॥४७॥ विज्ञानं स्वरभेदसाक्षात्कारः इदं भक्तिफलं यदि कदाचिदिदं
न स्यात्तर्हि अंते मरणकाले तव स्मृतिरवश्यं भूयादिति लोकोपकाराय प्रार्थ्यते ॥ अंते या मतिः सा गतिरिति न्या

दास्येतदखिलं कामं मा कुरुष्वाच संशयं ॥ ततः प्रीतेन मनसा भार्गवो राममब्रवीत् ॥४६॥ यदि मेनु
ग्रहो राम तवास्ति मधुसूदन ॥ त्वभ्दक्तसंगस्त्वत्पादे दृढा भक्तिः सदास्तु मे ॥४७॥ स्तोत्रमेतत्पठेद्यस्तु
भक्तिहीनोपि सर्वदा ॥ त्वद्भक्तिस्तस्य विज्ञानं भूयादंते स्मृतिस्तव ॥४८॥ तथेति राघवेणोक्तः परिक्र
म्य प्रणम्य तं ॥ पूजितस्तदनुज्ञातो महेंद्राचलमन्वगात् ॥४९॥ राजा दशरथो हृष्टो रामं मृतमिवाग
तं ॥ आलिंग्यालिंग्य हर्षेण नेत्राभ्यां जलमुत्सृजत् ॥५०॥ ततः प्रीतेन मनसा स्वस्यचित्तः पुरं ययौ
रामलक्ष्मणशत्रुघ्नभरता देवसंमिताः ॥५१॥ स्वां स्वां भार्यामुपादाय रेमिरे स्वस्वमंदिरे ॥ माता पि
तृभ्यां संहृष्टो रामः सीतासमन्वितः ॥५२॥ रेमे वैकुंठभवने श्रिया सह यथा हरिः ॥ युधाजिन्नाम
कैकेयीभ्राता भरतमातुलः ॥ भरतं नेतुमागच्छत्स्व राज्यं प्रीतिसंयुतः ॥५३॥ श्रीरामायनमः

यात्तत्स्मृतौ तद्वाधो वश्यं भावीति भावः ॥४८॥४९॥ मृतमिवागतं क्षत्रियकुलांतकात्सकाशादावर्त्तनेन तथा संभाव
नं ॥ उत्सृज्यत् ॥ उदसृजदित्यर्थः ॥ अडभाव आर्षः ॥५०॥ देवसंमताः देवतुल्याः ॥५१॥ संयमायनमः ॥ ॥

अ·रा·बा·
४०

युधाजितं संपूज्य भरतं शत्रुघ्नं चापि प्रेषयामासेत्यन्वयः ॥५४॥ पौलोम्या पुलोमायस्यभूतया शच्या शक्रेण च देवमा
तेवेत्यर्थः ॥५५॥ साकेते अयोध्यायां लोकनाथे सुप्रथिताः ॥ प्रसिद्धा गुणगणा यस्य सः ॥ लोके सम्यग्गाता कीर्तिर्यस्य स
कलजनसमूहस्यानंदसमूहरूपा मूर्तिर्यस्य सर्वतः शतगुणानंदत्वात्तस्येति भावः ॥ नित्यं श्रीः परा शक्तिर्यस्य अतए

प्रेषयामास भरतं राजा स्नेहसमन्वितः ॥ शत्रुघ्नं चापि संपूज्य युधाजितमरिंदमः ॥५४॥ कौसल्या मु
मुदे देवी रामेण सह सीतया ॥ देवमातेव पौलोम्या शच्या शक्रेण शोभना ॥५५॥ साकेते लोकनाथप्रथि
तगुणगणो लोकसंगीतकीर्तिः श्रीरामः सीतयास्ते लैखिं जननिकरानंदसंदोहमूर्तिः ॥ नित्यश्रीर्नि
र्विकारो निरवधिविभवो नित्यमायानिरासो मायाकार्यानुसारी मनुज इव सदा भाति देवोखिलेशः ॥५६॥
इति श्रीमदध्यात्मरामायणे बालकांडे उमामहेश्वरसंवादे सप्तमः सर्गः ॥७॥ इति बालकांड समा
प्तं ॥३६०॥ महादेव उवाच ॥ एकदा सुखमासीनं रामं स्वांतःपुराजिरे ॥ सर्वाभरणसंपन्नं रत्नसिं
हासने स्थितं ॥१॥

अध्यात्मबालकांडेत्र सर्गाः सप्तैव शंभुना ॥ दृष्टाः षष्ट्युत्तरत्रिंशच्छ्लोका मोक्षप्रदान्नृणाम् ॥३६०॥

राम
४

व निरवधिविभवः नित्यं मायाया आवरणशक्तिरूपाया निरासो यस्मात् ॥ माया सर्वथा यं प्रत्यनावरिकेति भावः ॥ माया
कार्यं सर्वमनुसरति सत्तास्फूर्तिभ्यां वाप्नोति तादृशः ॥ देवोपि अखिलेशोपि मायायैव यो मनुज इव भाति ॥५६॥ ⁘

अध्यात्मरामायण वालकांड समाप्तं

```
[OrderDescription]
,CREATED=18.02.20 11:42
,TRANSFERRED=2020/02/18 at 11:56:44
,PAGES=81
,TYPE=STD
,NAME=S0002847
,Book Name=M-2687-RAMAYAN BALKAND
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
```

```
FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
```

```
FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
```

```
FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,
```